gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac
CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

S'RĪ I

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

S'RĪ DEVĪMAHĀTMYA

देवीमाहात्म्यम्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रीदेवीमाहात्म्यम्

वे० रामचन्द्रशर्मणा

संशोधितम्

N. RAJAM & CO.
Vepery, Madras
1943

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

Price Rs. 1-4-0

Printed by
C. SUBBARAYUDU,
AT THE VASANTA PRESS,
ADYAR, MADRAS.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

श्रीदेवीमाहात्म्यविषयानुक्रमणिका

		पु०
१.	संकल्पः	१
२.	नवाङ्गविधिः	,,
३.	न्यासः	२,३
४.	आवाहनम्	४
५.	नामानि	४,५
६.	अर्गलम् (मार्कण्डेयपुराणे)	५–९
७.	कीलकम्	९–११
८.	गुरुकीलकम् (रहस्यतन्त्रे)	१२–१४
९.	हृदयम् (रुद्रयामले)	१४–१६
१०.	दलम् ,,	१७–१९
११.	ध्यानम्	१९–२३
१२.	कवचम् (वराहपुराणे)	२३–३०
१३.	नवाक्षरीविधिः	३०,३१
१४.	रात्रिसूक्तम् (वैदिकम्, ऋग्वेदान्तर्गतम)	३२
१५.	,, (पौराणिकम्)	३३,३४
१६.	सप्तशतीन्यासः	३४–३६
१७.	देवीमाहात्म्यम् (मार्कण्डेयपुराणे)	३७–११९
१८.	उत्तरन्यासः	१२०–१२२
१९.	देवीसूक्तम् (पौराणिकम्)	१२२–१२५
२०.	,, (वैदिकम्, ऋग्वेदान्तर्गतम्)	१२६, १२७
२१.	,, (तान्त्रिकम्, रुद्रयामले)	१२७–१३७
२२.	रहस्यत्रयम् (मार्कण्डेयपुराणे)	१३८–१४८

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust: Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

पु०

२३. देव्यपराधक्षमापणस्तोत्रम् . . १४९, १५०
२४. देवीस्तुतिः . . . १५१, १५२
२५. दुर्गास्तुतिः . . . १५३–१५६
२६. दुर्गाचन्द्रकलास्तुतिः—अप्पयदीक्षितः . १५७–१६०
२७. चण्डीरहस्यम्—नीलकण्ठदीक्षितः . १६०–१६७
२८. देवीमाहात्म्यस्तोत्रम् . . १६८–१७०
२९. देवीसप्तश्लोकी . . . १७०, १७१
३०. दुर्गासूक्तम् . . . १७२

शोधनसूची

पु०	पङ्क्तिः	शोधनम्	पु०	पङ्क्तिः	शोधनम्
२	६	इष्टकाम्य०	९२	५	ऐन्द्री
९	३	दैत्य०	९९	१०	देवीं
१७	१७	०गन्धर्व०	१०३	१४	युद्धं
३१	१४	विभ्रतीम्	१०९	१०	नाशनम्
३४	६	स्तूयते	११०	११	महासुरम्
३५	१	सरस्वत्यो०	११२	७	नाश०
३७	५	०दः स्वरूपम्	१२१	१,१४	उत्तर० ; तुल्यप्रभाम्
४८	२	वायुस्तत्त्वम् । य०	१४०	१७	सरस्वती
५४	१,१७	खड्गैः, खड्गा०	१४९	१	क्षमापण०
५५	१५	खड्ग०	१५०	११	कपाली
६३	५	०र्गीं जयाख्यां	१५१	८	क्षमापण०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

शिवाभ्यां नमः

श्रीगणेशशारदागुरुभ्यो नमः ।

ॐ नमश्चण्डिकायै ।

॥ श्रीदेवीमाहात्म्यम् ॥

संकल्पः—

अद्य श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रसादसिद्ध्यर्थं देवीसप्तशतीपाठाख्यं कर्म करिष्ये । तदङ्गत्वेनादौ नवाङ्गपूर्वकं क्रमेण रात्रिसूक्तपठनमन्ते देवीसूक्तरहस्यत्रयपठनं च करिष्ये ।

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥

लमित्यादिभिः पञ्चपूजां कुर्यात् ।

अथ नवाङ्गविधिः—

न्यासमावाहनं चैव नामान्यर्गलकीलके ।
हृदयं च दलं चैव ध्यानं कवचमेव च ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

माहात्म्यं च जपेन्नित्यमष्टम्यां तु विशेषतः ।
सौभाग्यं लभते नित्यं नरो मुच्येत संकटात् ॥

अथ न्यासः—

अस्य श्रीन्यासमहामन्त्रस्य मार्कण्डेयऋषिः । अनुष्टुप् छन्दः । महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः । ह्रीं बीजम् । श्रीं शक्तिः । क्लीं कीलकम् । इष्टाकाम्यार्थसिद्धचर्थे जपे विनियोगः । पादयोर्वाराह्यै नमः । जङ्घयोर्ब्रह्माण्यै नमः । ऊर्वो रुद्राण्यै नमः । नितम्बे नारसिंह्यै नमः । नाभौ चामुण्डायै नमः । जठरे पार्वत्यै नमः । उरसि शिवदूत्यै नमः । दक्षिणभुजे वैष्णव्यै नमः । वामभुजे माहेश्वर्यै नमः । हृदये शिवायै नमः । कण्ठे माहेन्द्र्यै नमः । मुखे कात्यायन्यै नमः । शिरसि माहेश्वर्यै नमः । भूमौ शाकंभर्यै नमः । अन्तरिक्षे कौशिक्यै नमः । सर्वाङ्गेषु श्रीचण्डिकायै नमः ।

अकारादिक्षकारान्तबीजाक्षरमहेश्वरी ।
यक्षराक्षसवेतालशाकिनीडाकिनीगणैः ॥ १ ॥
भूतप्रेतपिशाचैश्च विद्याधरसमन्विता ।
कालरात्री जगन्मूर्तिः सदानन्दस्वरूपिणी ॥ २ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ऐं ह्रीं क्लीं कवचाश्चैव त्रिवृद्धाद्याश्च शांभवी ।
विन्यसेन्मूर्ध्नि कामाक्षीं दुर्गां देवीं ललाटके ॥ ३ ॥

भ्रुवोर्मध्ये भद्रकालीं चक्षुर्मध्ये महेश्वरीम् ।
वाराहीं नासिकायां च कौमारीमोष्ठयोर्न्यसेत् ॥ ४ ॥

दन्तेषु नारसिंहीं च जिह्वायां चण्डिकां न्यसेत् ।
श्रोत्रद्वये न्यसेद् गौरीं कण्ठमध्ये तु वैष्णवीम् ॥ ५ ॥

हृदये च महालक्ष्मीं स्तनमध्ये तु पार्वतीम् ।
वक्षस्थले भगवतीं बाहुमूले तु शांभवीम् ॥ ६ ॥

बाहुमध्ये रुद्रकालीमङ्गुलीषु च मालिनीम् ।
ब्रह्माणीं नाभिमध्ये तु कटिमध्ये तु यक्षिणीम् ॥ ७ ॥

जङ्घाद्वये तथा गौरीं जानुमध्ये तु शाङ्करीम् ।
गुल्फद्वये च मातङ्गीं विजयां पादयोस्तथा ॥ ८ ॥

चामुण्डां रोमकूपेषु चर्मादिषु च भैरवीम् ।
रुधिरादिषु चेन्द्राणीं पुष्टाङ्गीं सर्वसंधिषु ॥ ९ ॥

सर्वाङ्गेषु च वाग्देवीं पृष्ठे ज्येष्ठां न्यसेत्क्रमात् ।

इति न्यासः ॥ १ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथावाहनम्—

मन्त्राक्षरमयीं देवीं मातृकारूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥

[इति मन्त्रेण हृदयकमलमध्ये देवीमावाह्य पञ्चोपचारं कृत्वा नामानि जपेत् ।]

इत्यावाहनम् ॥ २ ॥

अथ नामानि—

श्रीदेवीनाम्नामगस्त्यऋषिः । महाविराट् छन्दः । चिन्तामणिमहाविद्येश्वरी देवता । ऐं बीजम् । क्लीं शक्तिः । सौः कीलकम् । महामायाप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

ओं ऐं—

दिव्ययोगी महायोगी सिद्धयोगी गणेश्वरी ।
प्रेताशी डाकिनी काली कालरात्री निशाचरी ॥ १ ॥

झङ्कारी चोर्ध्ववेताली पिशाची भूतडामरी ।
ऊर्ध्वकेशी विरूपाक्षी शुष्काङ्गी नरभोजिनी ॥ २ ॥

राक्षसी घोररक्ताक्षी विश्वरूपी भयंकरी ।
चामुण्डी वीरकौमारी वाराही मुण्डधारिणी ॥ ३ ॥

भ्रामरी रुद्रवेताली भीष्मरी त्रिपुरान्तकी ।
भैरवी ध्वंसिनी क्रोधी दुर्मुखी प्रेतवाहिनी ॥ ४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

खट्वाङ्गी दीर्घलम्बोष्ठी मालिनी मन्त्रयोगिनी ।
कौशिकी मर्दिनी यक्षी रोमजङ्घा प्रहारिणी ॥ ५ ॥

कालाग्निर्ग्रामणी चक्री कङ्काली भुवनेश्वरी ।
फट्कारी वीरभद्रेशी धूम्राक्षी कलहप्रिया ॥ ६ ॥

कण्टकी नाटकी मारी यमदूती करालिनी ।
सहस्राक्षी कामलोला काकदंष्ट्री त्वधोमुखी ॥ ७ ॥

धूर्जटी विकटी घोरी कपाली विषलङ्घिनी ।
चतुःषष्टिः समाख्याता योगिन्यो वरसिद्धिदाः ॥ ८ ॥

नित्यं स्मरणमात्रेण सर्वपापक्षयो भवेत् ॥

इति नामानि ॥ ३ ॥

अथार्गलम्—

अस्य श्रीअर्गलस्तोत्रमहामन्त्रस्य स्वर्णाकर्षणभैरवऋषिः । अनुष्टुप् छन्दः । श्रीमहालक्ष्मीचण्डिका देवता । अं बीजम् । गं शक्तिः । लं कीलकम् । श्रीमहालक्ष्मीचण्डिकाप्रसादसिद्ध्यर्थे जपे विनियोगः । अं गं लमित्यादिभिः षडङ्गन्यासः ॥

ध्यानम्—

प्रकाशमध्यस्थितचित्स्वरूपां वराभये संदधतीं त्रिनेत्राम् ।
सिन्दूरवर्णाङ्कितकोमलाङ्गीं मायामयीं तत्त्वमयीं नमामि ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अर्गलं कीलकं चादौ पठित्वा कवचं पठेत् ।
जपेत्सप्तशतीं पश्चात्क्रम एष शिवोदितः ॥ १ ॥

अर्गलं दुरितं हन्ति कीलकं फलदं तथा ।
कवचं रक्षते नित्यं चण्डिकात्रितयं पठेत् ॥ २ ॥

अर्गलं हृदये यस्य तथानर्गलवानसौ ।
भविष्यतीति निश्चित्य शिवेन रचितं पुरा ॥ ३ ॥

कीलकं हृदये यस्य स कीलितमनोरथः ।
भविष्यति न संदेहो नान्यथा शिवभाषितम् ॥ ४ ॥

कवचं हृदये यस्य सर्वत्र कवची खलु ।
ब्रह्मणा निर्मितं पूर्वमिति निश्चित्य चेतसा ॥ ५ ॥

मार्कण्डेयः—

एकापि त्रिविधाख्याता सप्तधा सैव कीर्तिता ।
तस्या भेदा ह्यनन्ताश्च तन्माहात्म्यं शिवोदयम् ॥ ६ ॥

या देवी स्तूयते नित्यं विबुधैर्वेदपारगैः ।
सा मे वसतु जिह्वाग्रे ब्रह्मरूपा सरस्वती ॥ ७ ॥

जय त्वं देवि चामुण्डे जय भूतापहारिणि ।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥ ८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा नमोऽस्तु ते ॥ ९ ॥

मधुकैटभविद्राविविधातृवरदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १० ॥

महिषासुरनिर्नाशविधात्रि वरदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ११ ॥

वन्दिताङ्घ्रियुगे देवि देवसौभाग्यदायिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १२ ॥

रक्तबीजवधे देवि चण्डमुण्डविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १३ ॥

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १४ ॥

नतेभ्यः सर्वदा भक्त्या चण्डिके प्रणताय मे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १५ ॥

स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १६ ॥

चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation; Ja

देहि सौभाग्यमारोग्यं देहि देवि परं सुखम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १८ ॥

विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १९ ॥

विधेहि देवि कल्याणं विधेहि विपुलां श्रियम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २० ॥

विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २१ ॥

प्रचण्डदैत्यदर्पघ्नि चण्डिके प्रणताय मे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २२ ॥

चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २३ ॥

कृष्णेन संस्तुते देवि शश्वद्भक्त्या त्वमम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २४ ॥

हिमाचलसुतानाथपूजिते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २५ ॥

सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २७ ॥

देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २८ ॥

देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २९ ॥

पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥ ३० ॥

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।
स तु सप्तशतीसंख्यावरमाप्नोति संपदः ॥ ३१ ॥

भुक्त्वा तु सकलान्भोगानन्ते शिवपदं व्रजेत् ।

इत्यर्गलम् ॥ ४ ॥

अथ कीलकम्—

अस्य श्रीकीलकस्तोत्रमहामन्त्रस्य विशुद्धज्ञानऋषिः । अनुष्टुप् छन्दः । श्रीचण्डिका देवता । क्लां बीजम् । क्लीं शक्तिः । क्लूं कीलकम् । श्रीचण्डिकाप्रसादसिद्ध्यर्थे जपे विनियोगः । क्लामित्यादिभिः षडङ्गन्यासः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ध्यानम्—

शोणप्रभं सोमकलावतंसं पाणिस्फुरत्पञ्चशरेक्षुचापम् ।
प्राणप्रियं नौमि पिनाकपाणेः कोणत्रयस्थं कुलदैवतं नः ॥

ऋषिरुवाच—

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥ १ ॥

सर्वमेतद्विजानीयान्मन्त्राणामभिकीलकम् ।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥ २ ॥

सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ।
एतेन स्तुवतां देवी स्तोत्रमात्रेण सिद्ध्यति ॥ ३ ॥

न मन्त्रो नौषधं तत्र न किंचिदपि विद्यते ।
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥ ४ ॥

समग्राण्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः ।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥ ५ ॥

स्तोत्रं वै चण्डिकायास्तु तच्च गुह्यं चकार सः ।
समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम् ॥ ६ ॥

सो ऽपि क्षेममवाप्नोति सर्वमेव न संशयः ।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥ ७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति ।
इत्थंरूपेण कीलेन महादेवेन कीलितम् ॥ ८ ॥

यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम् ।
स सिद्धः स गणः सो ऽपि गन्धर्वो जायते ऽवने ॥ ९ ॥

न चैवाप्यटतस्तस्य भयं क्वापीह जायते ।
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥ १० ॥

ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ।
ततो ज्ञात्वैव संपन्नमिदं प्रारभ्यते बुधैः ॥ ११ ॥

सौभाग्यादि च यत्किंचिद्दृश्यते ललनाजने ।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् ॥ १२ ॥

शनैस्तु जप्यमाने ऽस्मिंस्तोत्रे संपत्तिरुच्चकैः ।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥ १३ ॥

ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसंपदः ।
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥ १४ ॥

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।
स रहस्यर्चनोपेतः समस्तफलमश्नुते ॥ १५ ॥

इति कीलकम् ॥ ५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ गुरुकीलकम्—

पुरा सनत्कुमाराय दत्तमेतन्मयानघ ।
संवर्ताय ददौ तच्च स चान्यस्मै ददौ च तत् ॥ १ ॥

सर्वत्र चण्डीपाठस्य प्राचुर्येण महीतले ।
ब्रह्मकाण्डः कर्मकाण्डस्तन्त्रकाण्डश्च सर्वथा ॥ २ ॥

अभूत्प्रतिहतोऽनेन शीघ्रसिद्धिप्रदायिना ।
तदा तेषां च सार्थक्यं कर्तुं कामेन भूतले ॥ ३ ॥

दानप्रतिग्रहत्वेन मन्त्रोऽयं कीलितो मया ।
दानप्रतिग्रहाख्यं यत्कीलकं समुदाहृतम् ॥ ४ ॥

तदारभ्य च मन्त्रोऽयं कीलकेनाभिकीलितः ।
न सर्वेषां भवेत्सिद्ध्यै ये कीलकपराङ्मुखाः ॥ ५ ॥

ये नराः कीलकेनेमं जपन्ति परया मुदा ।
तेषां देवी प्रसन्ना स्यात्ततः सर्वाः समृद्धयः ॥ ६ ॥

त्वत्प्रसूतस्त्वदाज्ञप्तस्त्वद्दासस्त्वत्परायणः ।
त्वन्नामचिन्तनपरस्त्वदर्थेऽहं नियोजितः ॥ ७ ॥

मयार्जितमिदं सर्वं तव स्वं परमेश्वरि ।
राष्ट्रं बलं कोशगृहं सैन्यमन्यच्च साधनम् ॥ ८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

त्वदधीनं करिष्यामि यत्रार्थे त्वं नियोक्ष्यसि ।
तत्र देवि सदा वर्त्ते तवाज्ञामेव पालयन् ॥ ९ ॥

इति संचिन्त्य मनसा स्वार्जितानि धनानि च ।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥ १० ॥

समर्पयेन्महादेव्यै स्वार्जितं सकलं धनम् ।
राष्ट्रं बलं कोशगृहं नवं यद्यदुपार्जितम् ॥ ११ ॥

अस्मिन्मासि मया देवि तुभ्यमेतत्समर्पितम् ।
इति ध्यात्वा ततो देव्याः प्रसादात्प्रतिगृह्य च ॥ १२ ॥

विभज्य पञ्चधा सर्वं त्र्यंशान्स्वार्थे प्रकल्पयेत् ।
देवपित्रतिथीनां च क्रियार्थं त्वेकमादिशेत् ॥ १३ ॥

एकांशं गुरवे दद्यात्तेन देवी प्रसीदति ।
तस्य राज्यं बलं सैन्यं कोशः साधु विवर्धते ॥ १४ ॥

नानारत्नाकरः श्रीमान्यथा पर्वणि वारिधिः ।
ज्ञात्वा नवाक्षरं मन्त्रं जीवब्रह्मसमाश्रयम् ॥ १५ ॥

तत्त्वमस्यादिवाक्यानां सारं संसारभेषजम् ।
सप्तशत्याख्यमन्त्रस्य यातज्जीवमहं जपम् ॥ १६ ॥

कुर्वंस्ततो न प्रमादं प्राप्नुयामिति निश्चयम् ।
कृत्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ॥ १७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोत् ।
अनिराकरणं मेऽस्तु अनिराकरणं मम ॥ १८ ॥

इति वेदान्तमूर्धन्ये छान्दोग्यस्य प्रपञ्चनात् ।
प्रारभ्य तत्परित्यागो न तस्य श्रेयसे मतः ॥ १९ ॥

नाब्रह्मवित्कुले तस्य जायते हि कदाचन ।
न दारिद्र्यं कुले तस्य यावत्स्थास्यति मेदिनी ॥ २० ॥

प्रतिसंवत्सरं कुर्याच्छारदं वार्षिकं तथा ।
तेन सर्वमवाप्नोति सुरासुरसुदुर्लभम् ॥ २१ ॥

अन्यच्च यद्यत्कल्याणं जायते तत्क्षणे क्षणे ।
सत्यं सत्यमिदं सत्यं गोपनीयं प्रयत्नतः ॥ २२ ॥

पुत्राय ब्रह्मनिष्ठाय पित्रा देयं महात्मना ।
अन्यथा देवता तस्मै शापं दद्यान्न संशयः ॥ २३ ॥

इति गुरुकीलकम् ॥

अथ हृदयम्—

अस्य श्रीचण्डिकाहृदयस्तोत्रमहामन्त्रस्य मार्कण्डेयऋषिः । अनुष्टुप् छन्दः । श्रीचण्डिका देवता । ह्रां बीजम् । ह्रीं शक्तिः । ह्रूं कीलकम् ! श्रीचण्डिकाप्रसादसिद्ध्यर्थे जपे विनियोगः । ह्रामित्यादिभिः षडङ्गन्यासः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ध्यानम् —

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

ब्रह्मोवाच—

अथातः संप्रवक्ष्यामि विस्तरेण यथातथम् ।
चण्डिकाहृदयं गुह्यं शृणुष्वैकाग्रमानसः ॥

ऐं ह्रीं क्लीं, ह्रां ह्रीं ह्रूं । जय जय चामुण्डे, चण्डिके, त्रिदशमणिमकुटकोटीरसंघट्टितचरणारविन्दे, गायत्रि, सावित्रि, सरस्वति, महाहिकृताभरणे, भैरवरूपधारिणि, प्रकटितदंष्ट्रोग्रवदने, घोरे, घोरानने, ज्वलज्वलज्ज्वालासहस्रपरिवृते, महाट्टहासबधिरीकृतदिगन्तरे, सर्वायुधपरिपूर्णे, कपालहस्ते, गंजाजिनोत्तरीये, भूतवेतालबृन्दपरिवृते, प्रकम्पितचराचरे, मधुकैटभमहिषासुरधूम्रलोचनचण्डमुण्डरक्तबीजशुम्भनिशुम्भादिदैत्यनिष्कण्टके, कालरात्रि, महामाये, शिवे, नित्ये, इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानप्रधानशक्तिभूते, ब्रह्मविष्णुशिवस्तुते, त्रिभुवनाधाराधारे, वामे, ज्येष्ठे, वरदे, रौद्रि, अम्बिके, ब्राह्मी-माहेश्वरी-कौमारी-वैष्णवी-शङ्खिनी-वाराहीन्द्राणी-चामुण्डा-शिवदूती-महाकाली-महालक्ष्मी-महासरस्वतीस्वरूपे, नादमध्यस्थिते, महोग्रविषोरगफणामणिघटितमकुटकटकादिरत्नमहाज्वालामयपादबाहु-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

कण्ठोत्तमाङ्गे, मालाकुले, महामहिषोपरि गन्धर्वविद्याधराराधिते, नवरत्ननिधिकोशे, तत्त्वस्वरूपे, वाक्पाणिपादपायूपस्थात्मिके, शब्दस्पर्शरूपरसगन्धादिस्वरूपे, त्वक्चक्षुश्श्रोत्रजिह्वाघ्राणमहाबुद्धिस्थिते, ॐ ऐंकारह्रींकारक्लींकारहस्ते, आं क्रों आग्नेयनयनपात्रे, प्रवेशय प्रवेशय, द्रां शोषय शोषय, द्रीं सुकुमारय सुकुमारय, श्रीं सर्वं प्रवेशय प्रवेशय, त्रैलोक्यवरवर्णिनि, समस्तचित्तं वशीकुरु वशीकुरु, मम शत्रून् शीघ्रं मारय मारय, जाग्रत्स्वप्नसुषुप्त्यवस्थास्वस्मान् राजचोराग्निजलवातविषभूतशत्रुमृत्युज्वरादिस्फोटकादिनानारोगेभ्यो नानाभिचारेभ्यो नानापवादेभ्यः परकर्ममन्त्रतन्त्रयन्त्रौषधशल्यशून्यक्षुद्रेभ्यः सम्यङ्मां रक्ष रक्ष ॥

ओं ऐं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः, स्फ्रां स्फ्रीं स्फ्रूं स्फ्रैं स्फ्रौं स्फ्रः, मम सर्वकार्याणि साधय साधय हुं फट् स्वाहा—
(इदमेकविंशतिवारं जपेत्)

राजद्वारे श्मशाने वा विवादे शत्रुसंकटे ।
भूताग्निचोरमध्यस्थे मयि कार्याणि साधय-स्वाहा ॥

चण्डिकाहृदयं गुह्यं त्रिसंध्यं यः पठेन्नरः ।
सर्वकामप्रदं पुंसां भुक्तिं मुक्तिं प्रयच्छति ॥

इति हृदयम् ॥ ६ ॥

CC-0: In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ दलम्—

ओं नमो भगवति जय जय चामुण्डे, चण्डि, चण्डेश्वरि, चण्डायुधे, चण्डरूपधारिणि, ताण्डवप्रिये, कुण्डलीभूतदिङ्नागमण्डलीकृतगण्डस्थले, समस्तजगदण्डसंहारकारिणि, परे, अनन्तानन्तरूपे, शिवे, नरशिरोमालालंकृतवक्षस्थले, महाकपालभालोज्ज्वलन्मणिमकुटचूडावतंसचन्द्रखण्डे, महाभीषणे, देवि, महामाये, षोडशकलापरिवृतोल्लासिते, महादेवासुरसमरनिहतरुधिरार्द्रीकृतालम्बिततनुकमलोद्भासितकरे, संपूर्णरुधिरशोभितमहाकपोलवक्त्रहासिनि, दृढतरनिबद्धयमानरोमराजीसहितहेमकाञ्चीदामोज्ज्वलितवसनारुणीभूतनूपुरप्रज्वलितमहीमण्डले, महाशंभुरूपे, महाव्याघ्रचर्माम्बरधरे, महासर्पयज्ञोपवीतिनि, महाश्मशानभस्मोद्धूलितसर्वाङ्गगात्रे, कालि, कङ्कालि, महाकालि, कालाग्निरुद्रकालि, कालसंकर्षिणि, कालनाशिनि, कालरात्रि, नभोभक्षिणि, नानाभूतप्रेतपिशाचगणसहस्रसंचारिणि, नानाव्याधिप्रशमनि, सर्वदुःखशमनि, सर्वदारिद्र्यनाशिनि, धगधगेत्यास्वादितमांसखण्डे, गात्रविक्षेपकलकलायमानकङ्कालधारिणि, मधुमांसरुधिरावसिक्तविलासिनि, सकलसुरासुरगन्धर्वयक्षविद्याधरकिंनरकिंपुरुषादिभिः स्तूयमानचरिते, सर्वमन्त्राधिकारिणि, सर्वशक्तिप्रधाने, सकललोकपावनि, सकलदुरितप्रक्षालिनि, सकललोकैकजननि, ब्राह्मि, माहेश्वरि, कौमरि, वैष्णवि, शङ्खिनि,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

वाराहि, इन्द्राणि, चामुण्डे, महालक्ष्मि, महाविद्ये, योगेश्वरि, योगिनि, चण्डिके, माये, विश्वरूपिणि, सर्वाभरणभूषिते, अतलवितलसुतलरसातलतलातलमहातलपातालादिभूर्भुवःसुवर्महर्जनस्तपःसत्याख्यचतुर्दशभुवनैकनाथे, महाक्रूरे, प्रसन्नरूपधारिणि, ओं नमः पितामहाय, ओं नमो नारायणाय, ओं नमःशिवायेति सकललोकजप्यमानब्रह्मविष्णुमहेश्वररूपिणि, दण्डकमण्डलुधारिणि, सावित्रि, सर्वमङ्गलप्रदे, सरस्वति, पद्मालये, पार्वति, सकलजगत्स्वरूपिणि, शङ्खचक्रगदापद्मधारिणि, परशुशूलपिनाकटङ्कधारिणि, शरचापशूलकरवालखड्गडमरुकाङ्कुशगदापरशुतोमरभिण्डिपालभुसुण्डीमुद्गरमुसलपरिघायुधदोर्दण्डसहस्रे, चन्द्रार्कवह्निनयने, इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानप्रधानशक्तिहेतुभूते, सप्तद्वीपसमुद्रोपर्युपरिव्याप्ते, ईश्वरि, महाप्रपञ्चमालालंकृतमेदिनीनाथे, महाप्रभावे, महाकैलासपर्वतोद्यानवनविहारिणि, नदीतीर्थदेवतायतनालंकृते, वसिष्ठवामेदवादिमहामुनिगणवन्द्यमानचरणारविन्दे, द्विचत्वारिंशद्वर्णमाहात्म्ये, पर्याप्तवेदवेदाङ्गाद्यनेकशास्त्राधारभूते, शब्दब्रह्ममयि, लिपिदेवते, मातृकादेवि, चिरं मां रक्ष रक्ष, मम शत्रून् हुंकारेण नाशय नाशय, भूतप्रेतपिशाचादीनुच्चाटयोच्चाटय, समस्तग्रहान् वशीकुरु वशीकुरु, मोहय मोहय, स्तम्भय स्तम्भय, मोदय मोदय, उन्मादयोन्मादय, विध्वंसय विध्वंसय, द्रावय द्रावय, श्रावय श्रावय, स्तोभय

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

स्तोभय, संक्रामय संक्रामय, सकलारातीन् मूर्ध्नि स्फोटय स्फोटय, मम शत्रून् शीघ्रं मारय मारय, जाग्रत्स्वप्नसुषुप्त्यवस्था-स्वस्मान् राजचोराग्निजलवातविषभूतशत्रुमृत्युज्वरादिनानारोगेभ्यो नानाभिचारेभ्यो नानापवादेभ्यः परकर्ममन्त्रतन्त्रयन्त्रौषधशल्य-शून्यक्षुद्रेभ्यः सम्यङ्मां रक्ष रक्ष। ॐ श्रीं ह्रीं क्ष्मौं मम शत्रुसर्व-प्राणसंहारकारिणि हुं फट् स्वाहा ॥

इति दलम् ॥ ७ ॥

ध्यानम्—

मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेलानिर्जितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि ।
निःशेषीकृतरक्तबीजदनुजे नित्ये निशुम्भापहे
शुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥१॥

भुजाष्टयुक्तां महिषस्य मर्दिनीं
सशङ्खचक्रां शरशूलधारिणीम् ।
तां दिव्ययोगीं सहजातवेदसीं
दुर्गां सदाऽहं शरणं प्रपद्ये ॥ २ ॥

महिषमस्तकनृत्तविनोदनस्फुटरणन्मणिनूपुरमेखला ।
जननरक्षणमोक्षविधायिनी जयतु शुम्भनिशुम्भनिषूदिनी ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघर्घरमुखी दंष्ट्री च वज्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु मां मातरः ॥ ४ ॥

उद्धतौ मधुकैटभौ महिषासुरं च निहत्य तं
धूम्रलोचनचण्डमुण्डरक्तबीजसुवधादृते ।
दुष्टशुम्भनिशुम्भमर्दिनि नन्दितामरवन्दिते
विष्टपत्रयतुष्टिकारिणि भद्रकालि नमो ऽस्तु ते ॥ ५ ॥

लक्ष्मीप्रदानसमये नवविद्रुमाभां
विद्याप्रदानसमये शरदिन्दुशुभ्राम् ।
विद्वेषिवर्गविजये ऽपि तमालनीलां
देवीं त्रिलोकजननीं शरणं प्रपद्ये ॥ ६ ॥

चन्द्रहासं त्रिशूलं च शङ्खचक्रगदास्तथा ।
धनुर्बाणं च मुसलं पिङ्गलं मुष्टिमेव च ॥ ७ ॥

पाशाङ्कुशेषुबाणं च मुद्गरं परशुं तथा ।
वज्रायुधं च कुन्तं च खट्वाङ्गं च हलायुधम् ॥ ८ ॥

भ्रमणं क्षुरिकां द्रोणं तोमरं पानपात्रकम् ।
प्रासपट्टसनागाश्च भुसुण्डीं वज्रदण्डके ॥ ९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

दर्पणं रुद्रवीणां च बिभ्रद्द्वात्रिंशदोस्तलाम् ।
एवं स्थितां महाकलीं भजे महिषमर्दिनीम् ॥ १० ॥

पद्मरागप्रभां देवीं बालार्ककिरणारुणाम् ।
दशपादाम्बुजां देवीं दशमण्डलपूरिताम् ॥ ११ ॥

दशाननां त्रिनेत्रां च समुन्नतपयोधराम् ।
रक्तवस्त्रपरीधानां रक्तमाल्यानुलेपनाम् ॥ १२ ॥

एवं ध्यायेन्महाज्वालां महिषासुरमर्दिनीम् ।
महासिंहाधिवाहां तां सर्वालंकारभूषिताम् ॥ १३ ॥

मातृकाष्टकमध्यस्थामष्टभैरवपूजिताम् ।
चिन्तामणिं महादुर्गां सर्वशत्रुविनाशिनीम् ॥ १४ ॥

ब्रह्माण्डमध्यजिह्वां तां महावक्त्रकरालिनीम् ।
शतहस्तशतां देवीं नानाशस्त्रास्त्रधारिणीम् ॥ १५ ॥

विचित्रायुधसंनद्धां विश्वरूपां शिवात्मिकाम् ।
संपूर्णयौवनां लक्ष्मीं कालिकां कमलाननाम् ॥ १६ ॥

दानवान्तकरीं देवीं रक्तबीजवधोद्यताम् ।
रक्तवस्त्रधरां चण्डीं भीषणामतिभैरवाम् ॥ १७ ॥

महाब्रह्माण्डमालाङ्गीं सर्वाभरणभूषिताम् ।
वेतालवाहनारूढां सिंहव्याघ्रादिवाहनाम् ॥ १८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

मधुकैटभसंहारीं महिषासुरमर्दिनीम् ।
चण्डमुण्डशिरश्छेत्रीं सर्वदैत्यनिषूदिनीम् ॥ १९ ॥

रक्तबीजस्य संहर्त्रीमशेषासुरभक्षिणीम् ।
निशुम्भशुम्भमथनीमशेषायुधभीषणाम् ॥ २० ॥

नरमांसप्रियां मायां मधुमांसोपहारिणीम् ।
य इदं श्रृणुयान्नित्यं त्रिसंध्यं यः पठेन्नरः ॥ २१ ॥

ऋणकोटिपरीहारं रोगदारिद्र्यनाशनम् ।
सर्वसिद्धिमवाप्नोति सर्वकामांश्च सर्वदा ॥ २२ ॥

भक्तानन्दकरीं देवीं परब्रह्मस्वरूपिणीम् ।
इष्टकामेश्वरीं सिद्धां सर्वशक्तिसमन्विताम् ॥ २३ ॥

अष्टादशसुपीठस्थां त्रिपुरामधिदेवताम् ।
वन्दे विश्वेश्वरीं देवीं भुक्तिमुक्तिफलप्रदाम् ॥ २४ ॥

एतत्सप्तशतीध्यानं सर्वरक्षाकरं नृणाम् ।
रसं रसायनं सिद्धिं गुलिकाञ्जनसिद्धिदम् ॥ २५ ॥

पादुकासिद्धिदं चैव खड्गसिद्धिकरं तथा ।
सिद्धसारस्वतं सिद्धं मन्त्रसिद्धिकरं तथा ॥ २६ ॥

ग्रहपीडोपशमनं सर्वसंकटनाशनम् ।
सौन्दर्यराजसंमानपुत्त्रपौत्त्राभिवर्धनम् ॥ २७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अष्टैश्वर्यसमृद्धित्वं योगित्वं काम्यरूपदम् ।
सदा संनिहितां लक्ष्मीं चण्डिकां मम देवताम् ॥ २८ ॥

स्मरेन्नित्यं प्रयत्नेन षण्मासात्प्राप्यते पुमान् ।
महाभयापहरणं शत्रुक्षयकरं तथा ॥ २९ ॥

अचलां श्रियमाप्नोति सर्वव्याधिविनाशनम् ।
अन्ते स्वर्गं च मोक्षं च सत्यमेव न संशयः ॥ ३० ॥

इति ध्यानम् ॥ ८ ॥

अथ कवचम्—

अस्य श्रीदेवीकवचस्तोत्रमहामन्त्रस्य, ब्रह्माऋषिः । अनुष्टुप् छन्दः । शक्तित्रयस्वरूपिणी महालक्ष्मीर्देवता । ह्रां बीजम् । ह्रीं शक्तिः । ह्रूं कीलकम् । श्रीमहालक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ॐ शंभुतेजो ज्वल ज्वालामालिनि पावकरोचिषे
ह्रां नन्दायै हृदयाय नमः ।
ॐ शंभुतेजो ज्वल ज्वालामालिनि पावकरोचिषे
ह्रीं नन्दायै शिरसे स्वाहा ।
ॐ शंभुतेजो ज्वल ज्वालामालिनि पावकरोचिषे
ह्रूं नन्दायै शिखायै वषट् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ॐ शंभुतेजो ज्वल ज्वालामालिनि पावकरोचिषे
हैं नन्दायै कवचाय हुम् ।
ॐ शंभुतेजो ज्वल ज्वालामालिनि पावकरोचिषे
ह्रौं नन्दायै नेत्रत्रयाय वौषट् ।
ॐ शंभुतेजो ज्वल ज्वालामालिनि पावकरोचिषे
हः नन्दायै अस्त्राय फट् ।
ॐ भूर्भुवःसुवरोमिति दिग्बन्धः ।

ध्यानम्—

शङ्खं चक्रमथो धनुश्च दधतीं विभ्रामितां तर्जनीं
वामे शक्तिमसिं शरान्कलयतीं तिर्यक्त्रिशूलं भुजैः ।
संबद्धं विविधायुधैः परिवृतां मन्त्रीं कुमारीजनै-
र्ध्यायेदिष्टवरप्रदां त्रिनयनां सिंहाधिरूढां शिवाम् ॥

वाणीपतेर्वरविमोहितदुष्टदैत्य-
दर्पाहिदष्टमनुजारिकुलाहितानि ।
तच्छृङ्गमध्यनटनेन विहन्यमानां
रक्षां करोतु मम सा त्रिपुराधिवासा ॥

शङ्खासिचापशरभिन्नकरां त्रिनेत्रां
तिग्मेतरांशुकलया विलसत्किरीटाम् ।
सिंहस्थितां ससुरसिद्धनुतां च दुर्गां
दूर्वानिभां दुरितवर्गहरां नमामि ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

मार्कण्डेय उवाच—

यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥ १ ॥

ब्रह्मोवाच—

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥ २ ॥

प्रथमं शैलपुत्त्रीति द्वितीयं ब्रह्मचारिणी ।
तृतीयं चन्द्रघण्टेति कूश्माण्डेति चतुर्थकम् ॥ ३ ॥

पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च ।
सप्तमं कालरात्रीति महागौरीति चाष्टमम् ॥ ४ ॥

नवमं सिद्धिदा प्रोक्ता नवदुर्गाः प्रकीर्तिताः ।
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥ ५ ॥

अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ।
विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥ ६ ॥

न तेषां जायते किंचिदशुभं रणसंकटे ।
नापदं तस्य पश्यामि शोकदुःखभयं न हि ॥ ७ ॥

यैस्तु भक्त्या स्मृता नूनं तेषामृद्धिः प्रजायते ।
प्रेतसंस्था तु चामुण्डा वाराही महिषासना ॥ ८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ऐन्द्रीगजसमारूढा वैष्णवी गरुडासना ।
माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥ ९ ॥

ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ।
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥ १० ॥

दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः ।
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥ ११ ॥

खेटकं तोमरं चैव परशुं पाशमेव च ।
कुन्तायुधं त्रिशूलं च शार्ङ्गायुधमनुत्तमम् ॥ १२ ॥

दैत्यानां देहनाशाय भक्तानामभयाय च ।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥ १३ ॥

महाबले महोत्साहे महाभयविनाशिनि ।
त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि ॥ १४ ॥

प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता ।
दक्षिणे रक्ष वाराही नैर्ऋत्यां खड्गधारिणी ॥ १५ ॥

प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी ।
रक्षेदुदीच्यां कौमारी ईशान्यां शूलधारिणी ॥ १६ ॥

ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद्वैष्णवी तथा ।
एवं दश दिशो रक्षेच्चामुण्डा शववाहना ॥ १७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

जया मे चाग्रतः स्थातु विजया स्थातु पृष्ठतः ।
अजिता वामपार्श्वे तु दक्षिणे चापराजिता ॥ १८ ॥

शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ।
मालाधरी ललाटे च भ्रुवौ रक्षेद्यशस्विनी ॥ १९ ॥

त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ।
शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ॥ २० ॥

कपोलौ कालिका रक्षेत्कर्णमूले तु शंकरी ।
नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ॥ २१ ॥

अधरे चामृतकला जिह्वायां च सरस्वती ।
दन्तान्रक्षतु कौमारी कण्ठमध्ये च चण्डिका ॥ २२ ॥

घण्टिकां चित्रघण्टा च महामाया च तालुके ।
कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमङ्गला ॥ २३ ॥

ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ।
नीलग्रीवा बहिष्कण्ठे नलिकां नलकूबरी ॥ २४ ॥

खड्गधारिण्युभौ स्कन्धौ बाहू मे वज्रधारिणी ।
हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च ॥ २५ ॥

नखाञ्छूलेश्वरी रक्षेत्कक्षौ रक्षेन्नलेश्वरी ।
स्तनौ रक्षेन्महादेवी मनः शोकविनाशिनी ॥ २६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

हृदयं ललिता देवी ह्युदरे शूलधारिणी ।
नाभिं च कामिनी रक्षेद्गुह्यं गुह्येश्वरी तथा ॥ २७ ॥

भूतनाथा च मेढ्रं च गुदं महिषवाहिनी ।
कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी ॥ २८ ॥

जङ्घे महाबला प्रोक्ता जानुमध्ये विनायकी ।
गुल्फयोर्नारसिंही च पादपृष्ठेऽमितौजसी ॥ २९ ॥

पादाङ्गुलीः श्रीधरी च पादाधस्तलवासिनी ।
नखान्दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ॥ ३० ॥

रोमकूपाणि कौबेरी त्वचं वागीश्वरी तथा ।
रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ॥ ३१ ॥

आन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ।
पद्मावती पद्मकोशे कफे चूडामणिस्तथा ॥ ३२ ॥

ज्वालामुखी नखज्वालामभेद्या.सर्वसंधिषु ।
शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ॥ ३३ ॥

अहंकारं मनो बुद्धिं रक्ष मे धर्मचारिणि ।
प्राणापानौ तथा व्यानसमानोदानमेव च ॥ ३४ ॥

यशः कीर्तिं च लक्ष्मीं च सदा रक्षतु चक्रिणी ।
गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके ॥ ३५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

पुत्रान्रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ।
मार्गं क्षेमंकरी रक्षेद्विजया सर्वतः स्थिता ॥ ३६ ॥

रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ।
तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥ ३७ ॥

पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ।
कवचेनावृतो नित्यं यत्र यत्र हि गच्छति ॥ ३८ ॥

तत्र तत्रार्थलाभश्च विजयः सर्वकामिकः ।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ॥ ३९ ॥

परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ।
निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ॥ ४० ॥

त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ।
इदं तु देव्याः कवचं देवानामपि दुर्लभम् ॥ ४१ ॥

यः पठेत्प्रयतो नित्यं त्रिसंध्यं श्रद्धयान्वितः ।
दैवी कला भवेत्तस्य त्रैलोक्ये चापराजितः ॥ ४२ ॥

जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ।
नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः ॥ ४३ ॥

स्थावरं जङ्गमं चापि कृत्रिमं चापि यद्विषम् ।
अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले ॥ ४४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ।
सहजाः कुलजा माला डाकिनी शाकिनी तथा ॥ ४५ ॥

अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः ।
ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ॥ ४६ ॥

ब्रह्मराक्षसवेतालाः कूश्माण्डा भैरवादयः ।
नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ॥ ४७ ॥

मानोन्नतिर्भवेद्राज्ञस्तेजो वृद्धिकरं परम् ।
यशसा वर्धते सोऽपि कीर्तिमण्डितभूतले ॥ ४८ ॥

जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ।
यावद्भूमण्डलं धत्ते सशैलवनकाननम् ॥ ४९ ॥

तांवत्तिष्ठति मेदिन्यां संततिः पुत्त्रपौत्त्रिकी ।
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ ५० ॥

प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ।

इति कवचम् ॥ ९ ॥

इति नवाङ्गविधिः ॥

अथ नवाक्षरीविधिः—

अस्य श्रीनवाक्षरीमहामन्त्रस्य, ब्रह्मविष्णुरुद्रा ऋषयः । गायत्र्युष्णिगनुष्टुभश्छन्दांसि । श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः । ऐं रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि । ह्रीं

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

नन्दाशकंभरीभीमाः शक्तयः । क्लीं अग्निर्वायुःसूर्यस्तत्त्वानि । ऋग्यजुःसामवेदा ध्यानानि । सर्वाभीष्टसिद्धचर्थे जपे विनियोगः । ओं ऐं अङ्गुष्ठाभ्यां नमः । ओं ह्रीं तर्जनीभ्यां नमः । ओं क्लीं मध्यमाभ्यां नमः । ओं चामुण्डायै अनामिकाभ्यां नमः । ओं विच्चे कनिष्ठिकाभ्यां नमः । ओं ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतलकरपृष्ठाभ्यां नमः—एवमेव हृदयादिन्यासाः कार्याः ॥

ध्यानम्—

मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेलानिर्जितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि ।
निःशेषीकृतरक्तबीजदनुजे नित्ये निशुम्भापहे
शुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥

सौवर्णाम्बुजमध्यगां त्रिनयनां सौदामिनीसंनिभां
शङ्खं चक्रवराभयं च दधतीमिन्दोः कलां बिभ्रतीम् ।
ग्रैवेयाङ्गदहारकुण्डलधरामाखण्डलाद्यैः स्तुतां
ध्यायेद्विन्ध्यनिवासिनीं शशिमुखीं पार्श्वस्थपञ्चाननाम् ॥

पञ्चोपचारं कृत्वा मूलमन्त्रेण—'ओं ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः'—इत्यष्टोत्तरं शतं जपित्वा देव्या वामकरे निवेदयेत ॥

इति नवाक्षरीविधिः ॥ १० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ रात्रिसूक्तम्—(वैदिकम्)

ॐ रात्रीति सूक्तस्य कुशिकऋषिः । रात्रिर्देवता । गायत्रीच्छन्दः । श्रीजगदम्बाप्रीत्यर्थे सप्तशतीपाठादौ विनियोगः ॥

ॐ रात्री व्यख्यदायती पुरुत्रा देव्य१क्षभिः ।
विश्वा अधि श्रियोऽधित ॥ १ ॥
ओर्वप्रा अमर्त्या निवतो देव्यु१द्वतः ।
ज्योतिषा बाधते तमः ॥ २ ॥
निरु स्वसारमस्कृतोषसं देव्यायती ।
अपेदु हासते तमः ॥ ३ ॥
सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि ।
वृक्षे न वसतिं वयः ॥ ४ ॥
नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः ।
नि श्येनासश्चिदर्थिनः ॥ ५ ॥
यावया वृक्य१ं वृकं यवय स्तेनमूर्म्ये ।
अथा नः सुतरा भव ॥ ६ ॥
उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थित ।
उष ऋणेव यातय ॥ ७ ॥
उप ते गा इवाकरं वृणीष्व दुहितर्दिवः ।
रात्रि स्तोमं न जिग्युषे ॥ ८ ॥

इति रात्रिसूक्तम् ॥ ११ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ रात्रिसूक्तम् (पौराणिकम्)

ॐ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥ १ ॥

ब्रह्मोवाच—

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ।
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ॥ २ ॥

अर्धमत्रा स्थिता नित्या यानुच्चार्या विशेषतः ।
त्वमेव सा त्वं सावित्री त्वं वेदजननी परा ॥ ३ ॥

त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ।
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सवदा ॥ ४ ॥

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥ ५ ॥

महाविद्या महामाया महामेधा महास्मृतिः ।
महामोहा भगवती महादेवी महासुरी ॥ ६ ॥

प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥ ७ ॥

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥ ८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणभुसुण्डीपरिघायुधा ॥ ९ ॥

सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ।
परापराणां परमा त्वमेव परमेश्वरी ॥ १० ॥

यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मके ।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयते सदा ॥ ११ ॥

यया त्वया जगत्स्रष्टा जगत्पातात्ति यो जगत् ।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ १२ ॥

विष्णुः शरीरग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥१३॥

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ।
मोहयन्तौ दुराधर्षावसुरौ मधुकैटभौ ॥ १४ ॥

प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥ १५ ॥

इति रात्रिसूक्तम् (पौराणिकम्) ॥ १२ ॥

अथ सप्तशतीन्यासः—

अस्य श्रीप्रथममध्यमोत्तमचरितरूपसप्तशतीमालामन्त्रस्य ब्रह्म-विष्णुरुद्रा ऋषयः । गायत्र्युष्णिगनुष्टुभश्छन्दांसि । श्रीमहा-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

कालीमहालक्ष्मीमहासरस्वत्यो देवताः । नन्दाशाकंभरीभीमाः शक्तयः । रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि । अग्निर्वायुःसूर्यास्तत्त्वानि । ऋग्यजुःसामवेदा ध्यानानि । सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः—

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणभुसुण्डी परिघायुधा ।
ऐं अङ्गुष्ठाभ्यां नमः ॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥
ह्रीं तर्जनीभ्यां नमः ॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥
क्लीं मध्यमाभ्यां नमः ॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यन्तघोराणि तै रक्षास्मांस्तथा भुवम् ॥
ऐं अनामिकाभ्यां नमः ॥

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्वतः ॥
ह्रीं कनिष्ठिकाभ्यां नमः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥

क्लीं करतलकरपृष्ठाभ्यां नमः ॥

[एवमेव हृदयादिन्यासाः कार्याः]

ध्यानम्—

विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
विभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥

इति सप्तशतीन्यासः ॥

[इति ध्यात्वा मानसोपचारैः संपूज्य गुरुदेवतात्मैक्यं विभाव्यार्थानुसंधानपूर्वकं मध्यमस्वरेण चण्डीस्तवं पठेत्]

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

श्रीमहादेव्यै नमः

श्रीदेवीमाहात्म्यप्रारम्भः

प्रथमोऽध्यायः

ॐ अस्य श्रीप्रथमचरितस्य ब्रह्मा ऋषिः । गायत्री छन्दः । महाकाली देवता । नन्दा शक्तिः । रक्तदन्तिका बीजम् । अग्निस्तत्त्वम् । ऋग्वेदो ध्यानम् । श्रीमहाकालीप्रीत्यर्थे प्रथमचरितपारायणे विनियोगः । ध्यानम्—

खड्गं चक्रगदेषुचापपरिघाञ्शूलं भुसुण्डीं शिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥

ॐ मार्कण्डेय उवाच ॥ १ ॥

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ २ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥ ३ ॥

स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ।
सुरथो नाम राजाऽभूत्समस्ते क्षितिमण्डले ॥ ४ ॥

तस्य पालयतः सम्यक्प्रजाः पुत्रानिवौरसान् ।
बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ॥ ५ ॥

तस्य तैरभवद्युद्धमतिप्रबलदण्डिनः ।
न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥ ६ ॥

ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ।
आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ॥ ७ ॥

अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ।
कोशो बलं चापहृतं तत्रापि स्वपुरे [1]ततः ॥ ८ ॥

ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ।
एकाकी हयमारुह्य जगाम गहनं वनम् ॥ ९ ॥

स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः ।
प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥ १० ॥

तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः ।
इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे ॥ ११ ॥

[1] सतः०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टचेतनः ।
मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ॥ १२ ॥

मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ।
न जाने सप्रधानो मे शूरहस्ती सदामदः ॥ १३ ॥

मम वैरिवशं यातः कान्भोगानुपलप्स्यते ।
ये ममानुगता नित्यं प्रसादधनभोजनैः ॥ १४ ॥

अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् ।
असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ॥ १५ ॥

सञ्चितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति ।
एतच्चान्यच्च सततं चिन्तयामास पार्थिवः ॥ १६ ॥

तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः ।
स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः ॥ १७ ॥

सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ।
इत्याकर्ण्य वचस्तस्य भूपतेः [1]प्रणयोदितम् ॥ १८ ॥

प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् ॥ १९ ॥

वैश्य उवाच ॥ २० ॥

समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ॥ २१ ॥

[1] प्रणतो०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ।
विहीनः स्वजनैर्दारैः पुत्रैरादाय मे धनम् ॥ २२ ॥

वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ।
सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् ॥ २३ ॥

प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः ।
किं नु तेषां गृहे क्षेममक्षेमं किं नु सांप्रतम् ॥ २४ ॥

कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः ॥ २५ ॥

राजोवाच ॥ २६ ॥

यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः ॥ २७ ॥

तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥ २८ ॥

वैश्य उवाच ॥ २९ ॥

एवमेतद्यथा प्राह भवानस्मद्गतं वचः ॥ ३० ॥

किं करोमि न बध्नाति मम निष्ठुरतां मनः ।
यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ॥ ३१ ॥

पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः ।
किमेतन्नाभिजानामि जानन्नपि महामते ॥ ३२ ॥

यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु ।
तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते ॥ ३३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् ॥ ३४ ॥

मार्कण्डेय उवाच ॥ ३५ ॥

ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥ ३६ ॥

समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः ।
कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम् ॥ ३७ ॥

उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥ ३८ ॥

राजोवाच ॥ ३९ ॥

भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ॥ ४० ॥

दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ।
ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि ॥ ४१ ॥

जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम ।
अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥ ४२ ॥

स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ।
एवमेष तथाहं च द्वावप्यत्यन्तदुःखितौ ॥ ४३ ॥

दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ।
तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥ ४४ ॥

ममास्य च भवत्येषा विवेकान्धस्य मूढता ॥ ४५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ऋषिरुवाच ॥ ४६ ॥

ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे ॥ ४७ ॥

विषयाश्च महाभाग यान्ति चैवं पृथक्पृथक् ।
दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे ॥ ४८ ॥

केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ।
ज्ञानिनो मनुजाः सत्यं किं नु ते न हि केवलम् ॥ ४९ ॥

यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ।
ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ॥ ५० ॥

मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ।
ज्ञानेऽपि सति पश्यैतान्पतङ्गाञ्छावचञ्चुषु ॥ ५१ ॥

कणमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा ।
मानुषा मनुजव्याघ्र साभिलाषाः सुतान्प्रति ॥ ५२ ॥

लोभात्प्रत्युपकाराय नन्वेतान्किं न पश्यसि ।
तथापि ममतावर्ते मोहगर्ते निपातिताः ॥ ५३ ॥

महामायाप्रभावेण संसारस्थितिकारिण[1]: ।
तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ॥ ५४ ॥

महामाया हरेश्चैतत्[2]तया संमोह्यते जगत् ।
ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥ ५५ ॥

[1] ०कारिणा० शा०

[2] श्चैषा०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

बलादाकृष्य मोहाय महामाया प्रयच्छति ।
तया विसृज्यते विश्वं [1]जगदेतच्चराचरम् ॥ ५६ ॥

सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ।
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥ ५७ ॥

संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ॥ ५८ ॥

राजोवाच ॥ ५९ ॥

भगवन्का हि सा देवी महामायेति यां भवान् ॥ ६० ॥

ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ।
[2]यत्स्वभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥ ६१ ॥

तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ ६२ ॥

ऋषिरुवाच ॥ ६३ ॥

नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ॥ ६४ ॥

तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ।
देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥ ६५ ॥

उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ।
योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ॥ ६६ ॥

[1] त्रैलोक्यं सचराचरम्.

[2] यत्प्रभावा०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

आस्तीर्य शेषमभजत्कल्पान्ते भगवान्प्रभुः ।
तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥ ६७ ॥

विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ।
स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ॥ ६८ ॥

दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ।
तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः ॥ ६९ ॥

विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ।
विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥ ७० ॥

निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥ ७१ ॥

ब्रह्मोवाच ॥ ७२ ॥

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥७३॥

सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ।
[1]अर्धमात्रा स्थिता नित्या यानुच्चार्या विशेषतः ॥ ७४ ॥

त्वमेव संध्या सावित्री त्वं [2]वेदजननी परा ।
त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥ ७५ ॥

त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ।
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥ ७६ ॥

[1] अर्धमात्रात्मिका॰ गु॰ [2] पराजननी॰

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ।
महाविद्या महामाया महामेधा महास्मृतिः ॥ ७७ ॥

महामोहा [1]भगवती महादेवी महेश्वरी ।
प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥ ७८ ॥

कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ।
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ ७९ ॥

लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ।
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ ८० ॥

शङ्खिनी चापिनी बाणभुसुण्डीपरिघायुधा ।
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ॥ ८१ ॥

परापराणां परमा त्वमेव परमेश्वरी ।
यच्च किञ्चित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥ ८२ ॥

तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ।
यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥ ८३ ॥

सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ।
विष्णुः शरीरग्रहणमहमीशान एव च ॥ ८४ ॥

कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ।
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥ ८५ ॥

[1] च भवती.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

[1]मोहयन्तौ दुराधर्षावसुरौ मधुकैटभौ ।
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥ ८६ ॥

[2]बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥ ८७ ॥

ऋषिरुवाच ॥ ८८ ॥

एवं स्तुता तदा देवी तामसी तत्र वेधसा ॥ ८९ ॥

विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ।
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ॥ ९० ॥

निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ।
उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ॥ ९१ ॥

एकार्णवेऽहिशयनात्ततः स ददृशे च तौ ।
मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ॥ ९२ ॥

क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ।
समुत्थाय ततस्ताभ्यां युयुधे भगवान्हरिः ॥ ९३ ॥

पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः ।
तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ॥ ९४ ॥

उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥ ९५ ॥

श्रीभगवानुवाच ॥ ९६ ॥

[1] मोहयैतौ॰ [2] भावश्च॰गु॰

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥ ९७ ॥

किमन्येन वरेणात्र एतावद्धि [1]वृतं मया ॥ ९८ ॥

ऋषिरुवाच ॥ ९९ ॥

वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत् ॥ १०० ॥

विलोक्य ताभ्यां गदितो भगवान्कमलेक्षणः ।
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥ १०१ ॥

ऋषिरुवाज ॥ १०२ ॥

तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता ।
कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः ॥ १०३ ॥

एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ।
प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ॥ १०४ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
मधुकैटभवधो नाम प्रथमोऽध्यायः ॥ १ ॥

उवाचमन्त्राः १४ ; अर्धमन्त्राः २४ ; श्लोकमन्त्राः ६६ ;
एवं मन्त्राः ॥ १०४ ॥

---

[1] व्रतं मम०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ द्वितीयोऽध्यायः

ॐ मध्यमचरितस्य विष्णुर्ऋषिः । महालक्ष्मीर्देवता । उष्णिक्छन्दः । शाकंभरी शक्तिः । दुर्गा बीजम् । यजुर्वेदः स्वरूपम् । महालक्ष्मीप्रीत्यर्थे जपे विनियोगः । ध्यानम्—

अक्षस्रक्परशू गदेषुकुलिशं पद्मं धनुष्कुण्डिकां
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥

ॐ ऋषिरुवाच ॥ १ ॥

देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ।
महिषेऽसुराणमधिपे देवानां च पुरंदरे ॥ २ ॥

तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ।
जित्वा च सकलान्देवानिन्द्रोऽभून्महिषासुरः ॥ ३ ॥

ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ।
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥ ४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् ।
त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥ ५ ॥

सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च ।
अन्येषां चाधिकारान्सः स्वयमेवाधितिष्ठति ॥ ६ ॥

स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ।
विचरन्ति यथा मर्त्या महिषेण दुरात्मना ॥ ७ ॥

एतद्वः कथितं सर्वममरारिविचेष्टितम् ।
शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम् ॥ ८ ॥

इत्थं निशम्य देवानां वचांसि मधुसूदनः ।
चकार कोपं शंभुश्च भ्रुकुटीकुटिलाननौ ॥ ९ ॥

ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ।
निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च ॥ १० ॥

अन्येषां चैव देवानां शक्रादीनां शरीरतः ।
निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥ ११ ॥

अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम् ।
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम् ॥ १२ ॥

अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् ।
एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥ १३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

यदभूच्छांभवं तेजस्तेनाजायत तन्मुखम् ।
याम्येन चाभवन्केशा बाहवो विष्णुतेजसा ॥ १४ ॥

सौम्येन स्तनयोर्युग्मं मध्यमैन्द्रेण चाभवत् ।
वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः ॥ १५ ॥

ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा ।
वसूनां च कराङ्गुल्यः कौबेरेण च नासिका ॥ १६ ॥

तस्यास्तु दन्ताः संभूताः प्राजापत्येन तेजसा ।
नयनत्रितयं जज्ञे तथा पावकतेजसा ॥ १७ ॥

भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च ।
अन्येषां चैव देवानां संभवस्तेजसां शिवा ॥ १८ ॥

ततः समस्तदेवानां तेजोराशिसमुद्भवाम् ।
तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः[1] ॥ १९ ॥

शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् ।
चक्रं च दत्तवान्कृष्णः समुत्पाद्य स्वचक्रतः ॥ २० ॥

शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः ।
मारुतो दत्तवांश्चापं [2]बाणपूर्णे तथेषुधी ॥ २१ ॥

[1] ततो देवा ददुस्तस्यै स्वानि स्वान्यायुधानि च ।
ऊचुर्जयजयेत्युच्चैर्जयन्तीं ते जयैषिणः ॥ इति शा०

[2] बाणपूर्णौ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिपः ।
ददौ तस्यै सहस्राक्षो घण्टामैरावताद्गजात् ॥ २२ ॥

कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ ।
प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम् ॥ २३ ॥

समस्तरोमकूपेषु निजरश्मीन्दिवाकरः ।
कालश्च दत्तवान्खड्गं तस्याश्चर्म च निर्मलम् ॥ २४ ॥

क्षीरोदश्चामलं हारमजरे च तथाम्बरे ॥ २५ ॥

चूडामणिं तथा दिव्यं कुण्डले कटकानि च ।
अर्धचन्द्रं तथा [1]शुभ्रं केयूरान्सर्वबाहुषु ।
नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तम् ॥ २६ ॥

अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च ।
विश्वकर्मा ददौ तस्यै परशुं चाति निर्मलम् ॥ २७ ॥

अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनम् ।
अम्लानपङ्कजां मालां शिरस्युरसि चापराम् ॥ २८ ॥

अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम् ।
हिमवान्वाहनं सिंहं रत्नानि विविधानि च ॥ २९ ॥

[1] दिव्यम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ददावशून्यं सुरया पानपात्रं धनाधिपः ।
शेषश्च सर्वनागेशो महामणिविभूषितम् ॥ ३० ॥

नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ।
अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥ ३१ ॥

संमानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ।
तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥ ३२ ॥

अमायतातिमहता प्रतिशब्दो महानभूत् ।
चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे ॥ ३३ ॥

चचाल वसुधा चेलुः सकलाश्च महीधराः ।
जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम् ॥ ३४ ॥

तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ।
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥ ३५ ॥

संनद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ।
आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥ ३६ ॥

अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ।
स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ॥ ३७ ॥

पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ।
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥ ३८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थिताम् ।
ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ॥ ३९ ॥
शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम् ।
महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥ ४० ॥
युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ।
रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥ ४१ ॥
अयुध्यतायुतानां च सहस्रेण महाहनुः ।
पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ॥ ४२ ॥
अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ।
गजवाजिसहस्रौघैरनेकैः परिवारितः ॥ ४३ ॥
वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ।
बिडालाख्योऽयुतानां[1] च पञ्चाशद्भिरथायुतैः ॥ ४४ ॥
युयुधे संयुगे तत्र रथानां परिवारितः ।
अन्ये च तत्रायुतशो रथनागहयैर्वृताः ॥ ४५ ॥
युयुधुः संयुगे देव्या सह तत्र महासुराः ।
कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ॥ ४६ ॥
हयानां च वृतो युद्धे तत्राभून्महिषासुरः ।
तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ॥ ४७ ॥

[1] महादैत्यः ०शा०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

युयुधुः संयुगे देव्या खङ्गैः परशुपट्टिशैः ।
केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥ ४८ ॥

देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ।
सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥ ४९ ॥

लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ।
अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ॥ ५० ॥

मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ।
सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ॥ ५१ ॥

चचारासुरसैन्येषु वनेष्विव हुताशनः ।
निःश्वासान्मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥ ५२ ॥

त एव सद्यः संभूता गणाः शतसहस्रशः ।
युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ॥ ५३ ॥

नाशयन्तोऽसुरगणान्देवीशक्त्युपबृंहिताः ।
अवादयन्त पटहान्गणाः शङ्खांस्तथापरे ॥ ५४ ॥

मृदङ्गांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ।
ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः[1] ॥ ५५ ॥

खङ्गादिभिश्च शतशो निजघान महासुरान् ।
पातयामास चैवान्यान्घण्टास्वनविमोहितान् ॥ ५६ ॥

[1] ०ऋष्टिभिः० ना०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

असुरान्भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ।
केचिद्द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥ ५७ ॥

विपोथिता निपातेन गदया भुवि शेरते ।
वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥ ५८ ॥

केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ।
निराकृताः शरौघेण कृताः केचिद्रणाजिरे ॥ ५९ ॥

[1]सेनानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः ।
केषांचिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ॥ ६० ॥

शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ।
विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः ॥ ६१ ॥

एकबाह्वक्षिचरणाः केचिद्देव्या द्विधा कृताः ।
छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥ ६२ ॥

कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः ।
ननृतुश्च परे तत्र युद्धे तूर्य[2]लयाश्रिताः ॥ ६३ ॥

कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ।
तिष्ठ तिष्ठेति भाषन्ते देवीमन्ये महासुराः ॥ ६४ ॥

पातितै रथनागाश्वैरसुरैश्च वसुन्धरा ।
अगम्या साभवत्तत्र यत्राभूत्स महारणः ॥ ६५ ॥

[1] श्येनानु० च०   [2] ०लयान्विताः० च०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

शोणितौघा महानद्यः सद्यस्तत्र [1]विसुस्रुवुः ।
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥ ६६ ॥

क्षणेन तन्महासैन्यमसुराणां तथाम्बिका ।
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् ॥ ६७ ॥

स च सिंहो महानादमुत्सृजन्धुतकेसरः ।
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥ ६८ ॥

देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः ।
यथैषां तुष्टुवुर्देवाः पुष्पवृष्टिमुचो दिवि ॥ ६९ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः ॥ २ ॥

उवाचमन्त्रः १ ; श्लोकमन्त्राः ६८ ; एवं मन्त्राः ६९ ;
एवमादितः १७३ ॥

---

[1] प्रसुस्रुवुः०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ तृतीयोऽध्यायः

उद्यद्भानुसहस्रकान्तमरुणक्षौमां शिरोमालिकां
रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वराम् ।
हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं
देवीं बद्धहिमांशुरत्नमुकुटां वन्दे सुमन्दस्मिताम् ॥

ऋषिरुवाच ॥ १ ॥

निहन्यमानं तत्सैन्यमवलोक्य महासुरः ।
सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम् ॥ २ ॥

स देवीं शरवर्षेण ववर्ष समरेऽसुरः ।
यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः ॥ ३ ॥

तस्य छित्त्वा ततो देवी लीलयैव शरोत्करान् ।
जघान तुरगान्बाणैर्यन्तारं चैव वाजिनाम् ॥ ४ ॥

चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् ।
विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ॥ ५ ॥

स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ॥ ६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ।
आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥ ७ ॥

तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ।
ततो जग्राह शूलं स कोपादरुणलोचनः ॥ ८ ॥

चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ।
जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ॥ ९ ॥

दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत ।
तेन तच्छतधा नीतं शूलं स च महासुरः ॥ १० ॥

हते तस्मिन्महावीर्ये महिषस्य चमूपतौ ।
आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥ ११ ॥

सोऽपि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतम् ।
हुंकाराभिहतां भूमौ पातयामास निष्प्रभाम् ॥ १२ ॥

भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ।
चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥ १३ ॥

ततः सिंहः समुत्पत्त्य गजकुम्भान्तरे स्थितः ।
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥ १४ ॥

युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ।
युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥ १५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ततो वेगात्खमुत्पत्य निपात्य च मृगारिणा ।
करप्रहारेण शिरश्चामरस्य पृथक्कृतम् ॥ १६ ॥

उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः ।
दन्तमुष्टितलैश्चैव करालश्च निपातितः ॥ १७ ॥

देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ।
बाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथान्धकम् ॥ १८ ॥

उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् ।
त्रिनेत्रं च त्रिशूलेन जघान परमेश्वरी ॥ १९ ॥

बिडालस्यासिना कायात्पातयामास वै शिरः ।
दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ॥ २० ॥

एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः ।
माहिषेण स्वरूपेण त्रासयामास तान्गणान् ॥ २१ ॥

कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान् ।
लाङ्गूलताडितांश्चान्यान्शृङ्गाभ्यां च विदारितान् ॥ २२ ॥

वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ।
निःश्वासपवनेनान्यान्पातयामास भूतले ॥ २३ ॥

निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ।
सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥ २४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः ।
शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥ २५ ॥

वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ।
लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥ २६ ॥

धुतशृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घनाः ।
श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥ २७ ॥

इति क्रोधसमाध्मातमापतन्तं महासुरम् ।
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् ॥ २८ ॥

सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम् ।
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥ २९ ॥

ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः ।
छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत ॥ ३० ॥

तत एवाशु पुरुषं देवी चिच्छेद सायकैः ।
तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ॥ ३१ ॥

करेण च महासिंहं तं चकर्ष जगर्ज च ।
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥ ३२ ॥

ततो महासुरो भूयो माहिषं वपुरास्थितः[1] ।
तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥ ३३ ॥

[1] ०राश्रितः ०शा०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ।
पपौ पुनः पुनश्चैव जहासारुणलोचना ॥ ३४ ॥

ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः ।
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ॥ ३५ ॥

सा च तान्प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ।
उवाच तं [1]मदोद्धूतमुखरागाकुलाक्षरम् ॥ ३६ ॥

देव्युवाच ॥ ३७ ॥

गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ।
मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ॥ ३८ ॥

ऋषिरुवाच ॥ ३९ ॥

एवमुक्त्वा समुत्पत्य सारूढा तं महासुरम् ।
पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् ॥ ४० ॥

ततः सोऽपि पदाक्रान्तस्तया निजमुखात्ततः ।
अर्धनिष्क्रान्त [2]एवाति देव्या वीर्येण संवृतः ॥ ४१ ॥

अर्धनिष्क्रान्त एवासौ युध्यमानो महासुरः ।
तया महासिना देव्या शिरश्छित्वा निपातितः ॥ ४२ ॥

[1] मदोद्धूत०
[2] एवासीत् ०शा०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ।
प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥ ४३ ॥

तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ।
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४४ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
महिषासुरवधो नाम तृतीयोऽध्यायः ॥ ३ ॥

उवाचमन्त्राः ३ ; श्लोकमन्त्राः ४१ ; एवं मन्त्राः ४४ ;
एवमादितः २१७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ चतुर्थोऽध्यायः

कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्राम् ।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं
ध्यायेद्दुर्गां त्रिदशपतिनुतां सेवितां सिद्धिकामैः ॥

ऋषिरुवाच ॥ १ ॥

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन्दुरात्मनि सुरारिबले च देव्या ।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ २ ॥

देव्या यया ततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥ ३ ॥

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च ।

CC-0. In Public Domain Sri Aurobindo Library, Rondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सा चण्डिकाखिलजगत्परिपालनाय
नाशाय [1]चाशुभभयस्य मतिं करोतु ॥ ४ ॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥ ५ ॥

किं वर्णयाम तव रूपमचिन्त्यमेत-
त्किं चातिवीर्यमसुरक्षयकारि भूरि ।
किं चाहवेषु चरितानि [2]तवातियानि
सर्वेषु देव्यसुरदेवगणादिकेषु ॥ ६ ॥

हेतुः समस्तजगतां त्रिगुणापि दोषै-
र्न ज्ञायसे हरिहरादिभिरप्यपारा ।
सर्वाश्रयाखिलमिदं जगदंशभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ७ ॥

यस्याः समस्तसुरतासमुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवि ।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥ ८ ॥

[1] ०चासुरभयस्य० ना० [2] तवाद्भुतानि०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्व-
[1]मभ्यस्यसे सुनियतेन्द्रियतत्वसारैः ।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमा हि देवि ॥ ९ ॥

शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम् ।
देवि त्रयी भगवती भवभावनाय
वार्ता च सर्वजगतां परमार्तिहन्त्री ॥ १० ॥

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा ।
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ ११ ॥

ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥ १२ ॥

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।

[1] अभ्यस्यते०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

प्राणान्मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥ १३ ॥

देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ।
विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य ॥ १४ ॥

ते संमता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः ।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥ १५ ॥

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति ।
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रये ऽपि फलदा ननु देवि तेन ॥ १६ ॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ॥ १७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ।
संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान्विनिहंसि देवि ॥ १८ ॥

दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।
लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वहितेषु साध्वी ॥ १९ ॥

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ।
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥ २० ॥

दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्यं च [1]हन्तृ.हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥ २१ ॥

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र ।

[1] ०हन्तृहृतदे०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥ २२ ॥

त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ॥ २३ ॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ २४ ॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २५ ॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थ[1]घोराणि तै रक्षास्मांस्तथा भुवम् ॥ २६ ॥

खड्गशूलगदादीनि यानि शस्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्वतः[2] ॥ २७ ॥

ऋषिरुवाच ॥ २८ ॥

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ।
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥ २९ ॥

[1] चात्यन्तघोराणि० च० श०

[2] सर्वशः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैः सुधूपिता ।
प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान् ॥ ३० ॥

देव्युवाच ॥ ३१ ॥

व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् ॥ ३२ ॥

देवा ऊचुः ॥ ३३ ॥

भगवत्या कृतं सर्वं न किंचिदवशिष्यते ॥ ३४ ॥

यदयं निहतः शत्रुरस्माकं महिषासुरः ।
यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥ ३५ ॥

संस्मृता संस्मृता त्वं नो हिंसीथाः परमापदः ।
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥ ३६ ॥

तस्य वित्तर्द्धिविभवपुत्रदारादिसंपदाम् ।
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥ ३७ ॥

ऋषिरुवाच ॥ ३८ ॥

इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः ।
तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥ ३९ ॥

इत्येतत्कथितं भूप संभूता सा यथा पुरा ।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ ४० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

पुनश्च गौरीदेहा[1]त्सा समुद्भूता यथाभवत् ।
वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ॥ ४१ ॥

रक्षणाय च लोकानां देवानामुपकारिणी ।
तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ॥ ४२ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
शक्रादिस्तुतिर्नाम चतुर्थोऽध्यायः ॥ ४ ॥

उवाचमन्त्राः ५; अर्धमन्त्रौ २; श्लोकमन्त्राः ३५;
एवं मन्त्राः ४२; एवमादितः २५९ ॥

---

[1] देहा सा० च०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ पञ्चमोऽध्यायः

ॐ अस्य श्रीउत्तमचरितस्य रुद्र ऋषिः । अनुष्टुप्छन्दः । महासरस्वती देवता । भीमा शक्तिः । भ्रामरी बीजम् । सूर्यस्तत्त्वम् । सामवेदःस्वरूपम् । महासरस्वतीप्रीत्यर्थे विनियोगः ।

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ।
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनु भजे शुम्भादिदैत्यार्दिनीम् ॥

ऋषिरुवाच ॥ १ ॥

पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः ।
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥ २ ॥

तावेव सूर्यतां तद्वदधिकारं तथैन्दवम् ।
कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ ३ ॥

तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ।
ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥ ४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः ।
महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम् ॥ ५ ॥

तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ।
भवतां नाशयिष्यामि तत्क्षणात्परमापदः ॥ ६ ॥

इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम् ।
जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥ ७ ॥

देवा ऊचुः ॥ ८ ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ ९ ॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥ १० ॥

कल्याण्यै [1]प्रणतावृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ ११ ॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ १२ ॥

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ १३ ॥

[1] प्रणतां वृद्ध्यै०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै (१४) नमस्तस्यै (१५) नमस्तस्यै नमो नमः ॥ १६ ॥

या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।
नमस्तस्यै (१७) नमस्तस्यै (१८) नमस्तस्यै नमो नमः ॥१९॥

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।
नमस्तस्यै (२०) नमस्तस्यै (२१) नमस्तस्यै नमो नमः ॥२२॥

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।
नमस्तस्यै (२३) नमस्तस्यै (२४) नमस्तस्यै नमो नमः ॥२५॥

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।
नमस्तस्यै (२६) नमस्तस्यै (२७) नमस्तस्यै नमो नमः ॥२८॥

या देवी सर्वभूतेषु छायारूपेण संस्थिता ।
नमस्तस्यै (२९) नमस्तस्यै (३०) नमस्तस्यै नमो नमः ॥३१॥

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै (३२) नमस्तस्यै (३३) नमस्तस्यै नमो नमः ॥३४॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तस्यै (३५) नमस्तस्यै (३६) नमस्तस्यै नमो नमः ॥३७॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।
नमस्तस्यै (३८) नमस्तस्यै (३९) नमस्तस्यै नमो नमः ॥४०॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै (४१) नमस्तस्यै (४२) नमस्तस्यै नमो नमः ॥४३॥

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै (४४) नमस्तस्यै (४५) नमस्तस्यै नमो नमः ॥४६॥

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै (४७) नमस्तस्यै (४८) नमस्तस्यै नमो नमः ॥४९॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै (५०) नमस्तस्यै (५१) नमस्तस्यै नमो नमः ॥५२॥

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ।
नमस्तस्यै (५३) नमस्तस्यै (५४) नमस्तस्यै नमो नमः ॥५५॥

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।
नमस्तस्यै (५६) नमस्तस्यै (५७) नमस्तस्यै नमो नमः ॥५८॥

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ।
नमस्तस्यै (५९) नमस्तस्यै (६०) नमस्तस्यै नमो नमः ॥६१॥

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ।
नमस्तस्यै (६२) नमस्तस्यैं (६३) नमस्तस्यै नमो नमः ॥६४॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता ।
नमस्तस्यै (६५) नमस्तस्यै (६६) नमस्तस्यै नमो नमः ॥६७॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

या देवी सर्वभुतेषु तुष्टिरूपेण संस्थिता ।
नमस्तस्यै (६८) नमस्तस्यै (६९) नमस्तस्यै नमो नमः ॥७०॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै (७१) नमस्तस्यै (७२) नमस्तस्यै नमो नमः ॥७३॥

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ।
नमस्तस्यै (७४) नमस्तस्यै (७५) नमस्तस्यै नमो नमः ॥७६॥

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ।
भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥ ७७ ॥

चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ।
नमस्तस्यै (७८) नमस्तस्यै (७९) नमस्तस्यै नमो नमः ॥८०॥

स्तुता सुरैः पूर्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥ ८१ ॥

या सांप्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः ॥ ८२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ऋषिरुवाच ॥ ८३ ॥

एवं [1]स्तवादियुक्तानां देवानां तत्र पार्वती ।
स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ॥ ८४ ॥

साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः स्तूयतेऽत्र का ।
शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा ॥ ८५ ॥

स्तोत्रं ममैतत्क्रियते शुम्भदैत्यनिराकृतैः ।
देवैः समस्तैः समरे निशुम्भेन पराजितैः ॥ ८६ ॥

शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका ।
कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥ ८७ ॥

[2]तस्यांविनिर्गतायां तु कृष्णाभूत्सापि पार्वती ।
कालिकेति समाख्याता हिमाचलकृताश्रया ॥ ८८ ॥

ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम् ।
ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ॥ ८९ ॥

ताभ्यां शुम्भाय चाख्याता सातीव सुमनोहरा ।
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् ॥ ९० ॥

नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमम् ।
ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥ ९१ ॥

[1] स्तवाभि० शा०

[2] तस्या विनिर्गता या तु० गु०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा ।
सा तु तिष्ठति दैत्येन्द्र तां भवान्द्रष्टुमर्हति ॥ ९२ ॥
यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ।
त्रैलोक्ये तु समस्तानि सांप्रतं भान्ति ते गृहे ॥ ९३ ॥
ऐरावतः समानीतो गजरत्नं पुरन्दरात् ।
पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥ ९४ ॥
विमानं हंससंयुक्तमेतत्तिष्ठति तेऽङ्गणे ।
रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ॥ ९५ ॥
निधिरेष महापद्मः समानीतो धनेश्वरात् ।
किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम् ॥ ९६ ॥
छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति ।
तथायं स्यन्दनवरो यः पुरासीत्प्रजापतेः ॥ ९७ ॥
मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ।
पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥ ९८ ॥
निशुम्भस्याब्धिजाताश्च समस्ता रत्नजातयः ।
वह्निश्चापि ददौ तुभ्यमग्निशौचे च वाससी ॥ ९९ ॥
एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते ।
स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥ १०० ॥

ऋषिरुवाच ॥ १०१ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः ।
प्रेषयामास सुग्रीवं दूतं देव्या [1]महासुरम् ॥ १०२ ॥

इति चेति च वक्तव्या सा गत्वा वचनान्मम ।
यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया लघु ॥ १०३ ॥

स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ।
सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा ॥ १०४ ॥

दूत उवाच ॥ १०५ ॥

देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ।
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥ १०६ ॥

अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ।
निर्जिताखिलदैत्यारिः स यदाह श्रृणुष्व तत् ॥ १०७ ॥

मम त्रैलोक्यमखिलं मम देवा वशानुगाः ।
यज्ञभागानहं सर्वानुपाश्नामि पृथक्पृथक् ॥ १०८ ॥

त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ।
तथैव गजरत्नं च हृतं देवेन्द्रवाहनम् ॥ १०९ ॥

क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ।
उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥ ११० ॥

यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ।
रत्नभूतानि भूतानि तानि मय्येव शोभने ॥ १११ ॥

[1] महासुरः० शा०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ।
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥ ११२ ॥
मां वा ममानुजं वापि निशुम्भमुरुविक्रमम् ।
भज त्वं चञ्चलापाङ्गे रत्नभूतासि वै यतः ॥ ११३ ॥
परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ।
एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥ ११४ ॥
ऋषिरुवाच ॥ ११५ ॥
इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ ।
दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥ ११६ ॥
देव्युवाच ॥ ११७ ॥
सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितम् ।
त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ॥ ११८ ॥
किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् ।
श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥ ११९ ॥
यो मां जयति संग्रामे यो मे दर्पं व्यपोहति ।
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥ १२० ॥
तदागच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः ।
मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥ १२१ ॥
दूत उवाच ॥ १२२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ।
त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भनिशुम्भयोः ॥ १२३ ॥

अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ।
तिष्ठन्ति संमुखे देवि किं पुनः स्त्री त्वमेकिका ॥ १२४ ॥

इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ।
शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि संमुखम् ॥ १२५ ॥

सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः ।
केशाकर्षणनिर्धूतगौरवा मागमिष्यसि ॥ १२६ ॥

देव्युवाच ॥ १२७ ॥

एवमेतद्बली शुम्भो निशुम्भश्चातिवीर्यवान् ।
किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥ १२८ ॥

स त्वं गच्छ मयैवोक्तं यदेतत्सर्वमादितः ।
तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु यत् ॥ १२९ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
देवीदूतसंवादो नाम पञ्चमोऽध्यायः ॥ ५ ॥

उवाच मन्त्राः ९; त्रिपान्मन्त्राः ६६; श्लोकमन्त्राः ५४;
एवं मन्त्राः १२९; एवमादितः ३८८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ षष्ठोऽध्यायः

नागाधीश्वरविष्टरां फणिफणोत्तंसोरुरत्नावलीं
भास्वद्देहलतां दिवाकरनिभां नेत्रत्रयोद्भासिताम् ।
मालाकुम्भकपालनीरजकरां चन्द्रार्धचूडां परां
सर्वज्ञेश्वरभैरवाङ्कनिलयां पद्मावतीं चिन्तये ॥

ऋषिरुवाच ॥ १ ॥

इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ।
समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥ २ ॥

तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ।
सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ॥ ३ ॥

हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ।
तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ॥ ४ ॥

तत्परित्राणदः कश्चिद्यदि चोत्तिष्ठते परः ।
स हन्तव्यो ऽमरो वापि यक्षो गन्धर्व एव वा ॥ ५ ॥

ऋषिरुवाच ॥ ६ ॥

तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ।
वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥ ७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ।
जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ॥ ८ ॥

न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ।
ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥ ९ ॥

देव्युवाच ॥ १० ॥

दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः ।
बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥ ११ ॥

ऋषिरुवाच ॥ १२ ॥

इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ।
हुंकारेणैव तं भस्म सा चकाराम्बिका ततः ॥ १३ ॥

अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ।
ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥ १४ ॥

ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् ।
चचारासुरसेनायां सिंहो देव्याः स्ववाहनः ॥ १५ ॥

कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ।
[1]आक्रान्त्या चरणेनान्याञ्जघान स महासुरान् ॥ १६ ॥

केषांचित्पाटयामास नखैः कोष्ठानि केसरी ।
तथा तलप्रहारेण शिरांसि कृतवान्पृथक् ॥ १७ ॥

[1] आक्रम्य० च०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ।
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥ १८ ॥

क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ।
तेन केसरिणा देव्या वाहनेनातिकोपिना ॥ १९ ॥

श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ।
बलं च [1]क्षयितं कृत्स्नं देवीकेसरिणा ततः ॥ २० ॥

चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ।
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥ २१ ॥

हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ ।
[2]तत्र गच्छत गत्वा च सा समानीयतां लघु ॥ २२ ॥

केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ।
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥ २३ ॥

तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ।
शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथाम्बिकाम् ॥ २४ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
धूम्रलोचनवधो नाम षष्ठोऽध्यायः ॥ ६ ॥

उवाचमन्त्राः ४ ; श्लोकमन्त्राः २० ; एवं मन्त्राः २४ ;
एवमादितः ४१२ ॥

---

[1] क्षपितं० शा०   [2] गच्छ त्वं तत्र गत्वा च०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ सप्तमोऽध्यायः

ध्यायेयं रत्नपीठे शुककलपठितं शृण्वतीं श्यामलाङ्गीं
न्यस्तैकाङ्घ्रिं सरोजे शशिशकलधरां वल्लकीं वादयन्तीम् ।
कल्हाराबद्धमालां नियमितविलसच्चोलिकां रक्तवस्त्रां
मातङ्गीं शङ्खपात्रां मधुरमधुमदां चित्रकोद्भासिभालाम् ॥

ऋषिरुवाच ॥ १ ॥

आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ।
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥ २ ॥

ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ।
सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने ॥ ३ ॥

ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ।
आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥ ४ ॥

ततः कोपं चकारोच्चैरम्बिका तानरीन्प्रति ।
कोपेन चास्या वदनं मसीवर्णमभूत्तदा ॥ ५ ॥

भ्रुकुटीकुटीलात्तस्या ललाटफलकाद्द्रुतम् ।
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥ ६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

विचित्रखट्वाङ्गधरा शिरोमालाविभूषणा ।
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ॥ ७ ॥

अतिविस्तारवदना जिह्वाललनभीषणा ।
निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥ ८ ॥

सा वेगेनाभिपतिता घातयन्ती महासुरान् ।
सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥ ९ ॥

पार्ष्णिग्राहाङ्कुशग्राही योधघण्टासमन्वितान् ।
समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥ १० ॥

तथैव योधं तुरगै रथं सारथिना सह ।
निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यतिभैरवम् ॥ ११ ॥

एकं जग्राह केशेषु ग्रीवायामथ चापरम् ।
पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ॥ १२ ॥

तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः ।
मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥ १३ ॥

बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम् ।
ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥ १४ ॥

असिना निहताः केचित्केचित्खट्वाङ्गताडिताः ।
जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा ॥ १५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

क्षणेन तद्बलं सर्वमसुराणां निपातितम् ।
दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् ॥ १६ ॥

शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ।
छादयामास चक्रैश्च मुण्डक्षिप्तैः सहस्रशः ॥ १७ ॥

तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ।
बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् ॥ १८ ॥

ततो जहासातिरुषा भीमं भैरवनादिनी ।
काली करालवदना दुर्दर्शदशनोज्ज्वला ॥ १९ ॥

उत्थाय च महासिंहं देवी चण्डमधावत ।
[1]गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥ २० ॥

अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् ।
तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ॥ २१ ॥

हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ।
मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥ २२ ॥

शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च ।
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् ॥ २३ ॥

[1] छिन्ने शिरसि दैत्येन्द्रश्चक्रे नादं सुभैरवम् ।
येन नादेन महता त्रासितं भुवनत्रयम् ॥ इति गु० शा०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ।
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ॥ २४ ॥

ऋषिरुवाच ॥ २५ ॥

तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ ।
उवाच काली कल्याणी ललितं चण्डिका वचः ॥ २६ ॥

यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवी भविष्यसि ॥ २७ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये चण्डमुण्डवधो नाम सप्तमोऽध्यायः ॥ ७ ॥

उवाचमन्त्राः २ ; श्लोकमन्त्राः २५ ; एवं मन्त्राः २७ ;
एवमादितः ४३९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अष्टमोऽध्यायः

अरुणां करुणातरङ्गिताक्षीं
धृतपाशाङ्कुशचापबाणहस्ताम् ।
अणिमादिभिरावृतां मयूखै-
रहमित्येव विभावये भवानीम् ॥

ऋषिरुवाच ॥ १ ॥

चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ।
बहुलेषु च सैन्येषु [1]क्षयितेष्वसुरेश्वरः ॥ २ ॥

ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ।
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥ ३ ॥

अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ।
कम्बूनां चतुराशीतिर्निर्यान्तु स्वबलैर्वृताः ॥ ४ ॥

कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै ।
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥ ५ ॥

[1] क्षपितेष्व०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः ।
युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ॥ ६ ॥

इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ।
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥ ७ ॥

आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ।
ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ॥ ८ ॥

ततः सिंहो महानादमतीव कृतवान्नृप ।
घण्टास्वनेन तन्नादमम्बिका चोपबृंहयत् ॥ ९ ॥

धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ।
निनादैर्भीषणैः काली जिग्ये विस्तारितानना ॥ १० ॥

तन्निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ।
देवी सिंहस्तथा काली सरोषैः परिवारिताः ॥ ११ ॥

एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ।
भवायामरसिंहानामतिवीर्यबलान्विताः ॥ १२ ॥

ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥ १३ ॥

यस्य देवस्य यद्रूपं यथा भूषणवाहनम् ।
तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ ॥ १४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥ १५ ॥

माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥ १६ ॥

कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥ १७ ॥

तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥ १८ ॥

यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥ १९ ॥

नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥ २० ॥

वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥ २१ ॥

ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ।
हन्यन्तामसुराः शीघ्रं मम प्रीत्याह चण्डिकाम् ॥ २२ ॥

ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी ॥ २३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सा चाह धूम्रजटिलमीशानमपराजिता ।
दूतत्वं गच्छ भगवन्पार्श्वं शुम्भनिशुम्भयोः ॥ २४ ॥
ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ ।
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥ २५ ॥
त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ।
यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥ २६ ॥
बलावलेपादथ चेद्भवन्तो युद्धकांक्षिणः ।
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥ २७ ॥
यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ।
शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ॥ २८ ॥
तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ।
अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता ॥ २९ ॥
ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ।
[1]ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥ ३० ॥
सा च तान्प्रहितान्बाणाञ्शूलशक्तिपरश्वधान् ।
चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः ॥ ३१ ॥
[2]तस्याग्रतस्तथा काली शूलपातविदारितान् ।
खट्वाङ्गपोथितांश्चारीन्कुर्वती व्यचरत्तदा ॥ ३२ ॥

[1] ववृषुः० शा०

[2] तस्यास्तथाग्रतः इति वा पाठः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

कमण्डलुजलाक्षेपहतवीर्यान्हतौजसः ।
ब्रह्माणी चाकरोच्छत्रून्येन येन स्म धावति ॥ ३३ ॥

माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ।
दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ॥ ३४ ॥

ऐन्द्रीकुलिशपातेन शतशो दैत्यदानवाः ।
पेतुर्विदारिता भूमौ[1] रुधिरौघप्रवर्षिणः ॥ ३५ ॥

तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ।
वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥ ३६ ॥

नखैर्विदारितांश्चान्यान्भक्षयन्ती महासुरान् ।
नारसिंही चचाराजौ नादापूर्णदिगम्बरा ॥ ३७ ॥

चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ।
पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ॥ ३८ ॥

इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान् ।
दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥ ३९ ॥

पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् ।
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥ ४० ॥

रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।
समुत्पतति मेदिन्यास्तत्प्रमाणो महासुरः ॥ ४१ ॥

[1] पृथ्व्यां० शा०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ।
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥ ४२ ॥

कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् ।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥ ४३ ॥

यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ।
तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥ ४४ ॥

ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः ।
समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥ ४५ ॥

पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ।
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥ ४६ ॥

वैष्णवी समरे चैनं चक्रेणाभिजघान ह ।
गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ॥ ४७ ॥

वैष्णवीचक्रभिन्नस्य रुधिरस्रावसंभवैः ।
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥ ४८ ॥

शक्त्या जघान कौमारी वाराही च तथासिना ।
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥ ४९ ॥

स चापि गदया दैत्यः सर्वा एवाहनत्पृथक् ।
मातॄः कोपसमाविष्टो रक्तबीजो महासुरः ॥ ५० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥ ५१ ॥

तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् ।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥ ५२ ॥

तान्विषण्णान्सुरान्दृष्ट्वा चण्डिका प्राह सत्वरा ।
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ॥ ५३ ॥

मच्छस्त्रपातसंभूतान्रक्तबिन्दून्महासुरान् ।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिता[1] ॥ ५४ ॥

भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान् ।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥ ५५ ॥

भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥ ५६ ॥

मुखेन काली जगृहे रक्तबीजस्य शोणितम् ।
ततोऽसावाजघानाथ गदया तत्र चण्डिकाम् ॥ ५७ ॥

न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ।
तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥ ५८ ॥

[1] वेगिना० शा०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

यतस्ततस्तद्वक्त्रेण चामुण्डा संप्रतीच्छति ।
मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ।
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ॥ ५९ ॥

देवी शूलेन वज्रेण बाणैरसिभि ऋष्टिभिः ।
जघान रक्तबीजं तं चामुण्डा पीतशोणितम् ॥ ६० ॥

स पपात महीपृष्ठे शस्त्रसंघसमाहतः ।
नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥ ६१ ॥

ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ॥ ६२ ॥

तेषां मातृगणस्तस्मिन्ननर्तासृङ्मदोद्धतः ॥ ६३ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
रक्तबीजवधो नामाष्टमोऽध्यायः ॥ ८ ॥

उवाचमन्त्रः १ ; अर्धमन्त्रः १ ; श्लोकमन्त्राः ६१ ;
एवं मन्त्राः ६३ ; एवमादितः ५०२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ नवमोऽध्यायः

बन्धूककाञ्चननिभां रुचिराक्षमालां
पाशाङ्कुशौ च वरदां निजबाहुदण्डैः ।
बिभ्राणमिन्दुशकलाभरणां त्रिनेत्रा-
मर्धाम्बिकेशमनिशं वपुराश्रयामि ॥

राजोवाच ॥ १ ॥

विचित्रमिदमाख्यातं भगवन्भवता मम ।
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥ २ ॥

भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ।
चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः ॥ ३ ॥

ऋषिरुवाच ॥ ४ ॥

चकार कोपमतुलं रक्तबीजे निपातिते ।
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥ ५ ॥

हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ।
अभ्यधावन्निशुम्भोऽथ मुख्ययासुरसेनया ॥ ६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ।
संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥ ७ ॥

आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः ।
निहन्तुं चण्डिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥ ८ ॥

ततो युद्धमतीवासीद्देव्याः शुम्भनिशुम्भयोः ।
शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥ ९ ॥

चिच्छेदास्तांश्छरांस्ताभ्यां चण्डिकास्वशरोत्करैः ।
ताडयामास चाङ्गेषु शस्त्रौघैरसुरेश्वरौ ॥ १० ॥

निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् ।
अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥ ११ ॥

ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम् ।
निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् ॥ १२ ॥

छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ।
तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ॥ १३ ॥

कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः ।
आयान्तं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥ १४ ॥

आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति ।
सापि देव्यास्त्रिशूलेन भिन्ना भस्मत्वमागता ॥ १५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ।
आहत्य देवी बाणौघैरपातयत भूतले ॥ १६ ॥

तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे ।
भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम् ॥ १७ ॥

स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ।
भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ॥ १८ ॥

तमायान्तं समालोक्य देवी शङ्खमवादयत् ।
ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम् ॥ १९ ॥

पूरयामास ककुभो निजघण्टास्वनेन च ।
समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥ २० ॥

ततः सिंहो महानादैस्त्याजितेभमहामदैः ।
पूरयामास गगनं गां तथोपदिशो दश ॥ २१ ॥

ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ।
कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः ॥ २२ ॥

अट्टाट्टहासमशिवं शिवदूती चकार ह ।
तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ ॥ २३ ॥

दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा ।
तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥ २४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ।
आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ॥ २५ ॥

सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् ।
निर्घातनिःस्वनो घोरो जितवानवनीपते ॥ २६ ॥

शुम्भमुक्ताञ्शरान्देवी शुम्भस्तत्प्रहिताञ्शरान् ।
चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ॥ २७ ॥

ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् ।
स तदाभिहतो भूमौ मूर्च्छितो निपपात ह ॥ २८ ॥

ततो निशुम्भः संप्राप्य चेतनामात्तकार्मुकः ।
आजघान शरैर्देवीं कालीं केसरिणं तथा ॥ २९ ॥

पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ।
चक्रायुधेन दितिजश्छादयामास चण्डिकाम् ॥ ३० ॥

ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ।
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥ ३१ ॥

ततो निशुम्भो वेगेन गदामादाय चण्डिकाम् ।
अभ्यधावत वै हन्तुं दैत्यसैन्यसमावृतः ॥ ३२ ॥

तस्यापतत एवाशु गदां चिच्छेद चण्डिका ।
खड्गेन शितधारेण स च शूलं समाददे ॥ ३३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

शूलहस्तं समायान्तं निशुम्भममरार्दनम् ।
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ॥ ३४ ॥
भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः ।
महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥ ३५ ॥
तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ।
शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि ॥ ३६ ॥
ततः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् ।
असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥ ३७ ॥
कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ।
ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ॥ ३८ ॥
माहेश्वरी त्रिशूलेन भिन्नाः पेतुस्तथापरे ।
वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ॥ ३९ ॥
खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः ।
वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ॥ ४० ॥
केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् ।
भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥ ४१ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
निशुम्भवधो नाम नवमोऽध्यायः ॥ ९ ॥

उवाच मन्त्रौ २; श्लोकमन्त्राः ३९; एवं मन्त्राः ४१;
एवमादितः ५४३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ दशमोऽध्यायः

उत्तप्तहेमरुचिरां रविचन्द्रवह्नि-
नेत्रां धनुःशरयुताङ्कुशपाशशूलम् ।
रम्यैर्भुजैश्च दधतीं शिवशक्तिरूपां
कामेश्वरीं हृदि भजामि धृतेन्दुलेखाम् ॥

ऋषिरुवाच ॥ १ ॥

निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसंमितम् ।
हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ॥ २ ॥

बलावलेपाद्दुष्टे त्वं मा दुर्गे गर्वमावह ।
अन्यासां बलमाश्रित्य युध्यसे यातिमानिनी ॥ ३ ॥

देव्युवाच ॥ ४ ॥

एकैवाहं जगत्यत्र द्वितीया का ममापरा ।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥ ५ ॥

ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् ।
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥ ६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

देव्युवाच ॥ ७ ॥

अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता ।
तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥ ८ ॥

ऋषिरुवाच ॥ ९ ॥

ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः ।
पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥ १० ॥

शरवर्षैः शितैः शस्त्रैस्तथा चास्त्रैः सुदारुणैः ।
तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरम् ॥ ११ ॥

दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ।
बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥ १२ ॥

मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ।
बभञ्ज लीलयैवोग्रहुंकारोच्चारणादिभिः ॥ १३ ॥

ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ।
सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥ १४ ॥

छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ।
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥ १५ ॥

ततः खड्गमुपादाय शतचन्द्रं च भानुमत् ।
अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः ॥ १६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका ।
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ॥ १७ ॥

हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः ।
जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः ॥ १८ ॥

चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ।
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ॥ १९ ॥

स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ।
देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ॥ २० ॥

तलप्रहाराभिहतो निपपात महीतले ।
स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥ २१ ॥

उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ।
तत्रापि सा निराधारा युयुधे तेन चण्डिका ॥ २२ ॥

नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ।
चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम् ॥ २३ ॥

ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ।
उत्पात्य भ्रामयामास चिक्षेप धरणीतले ॥ २४ ॥

स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः ।
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया ॥ २५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम् ।
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ॥ २६ ॥

स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ।
चालयन्सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ॥ २७ ॥

ततः प्रसन्नमखिलं हते तस्मिन्दुरात्मनि ।
जगत्स्वास्थ्यमतीवाप[1] निर्मलं चाभवन्नभः ॥ २८ ॥

उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ।
सरितो मार्गवाहिन्यस्तथासं[2]स्तत्र पातिते ॥ २९ ॥

ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ।
बभूवुर्निहते तस्मिन्गन्धर्वा ललितं जगुः ॥ ३० ॥

अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ।
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥ ३१ ॥

जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनितस्वनाः ॥ ३२ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
शुम्भवधो नाम दशमोऽध्यायः ॥ १० ॥

उवाचमन्त्राः ४ ; अर्धमन्त्रः १ ; श्लोकमन्त्राः २७ ; एवं
मन्त्राः ३२ ; एवमादितः ५७५ ॥

---

[1] ०मतीवासीन्निर्मलम् ० [2] तथा शुम्भेऽत्र०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथैकादशोऽध्यायः

बालरविद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम् ।
स्मेरमुखीं वरदाङ्कुशपाशां भीतिकरां प्रभजे भुवनेशीम् ॥

ऋषिरुवाच ॥ १ ॥

देव्या हते तत्र महासुरेन्द्रे सेन्द्राः सुरा वह्निपुरोगमास्ताम् ।
कात्यायनीं तुष्टुवुरिष्टलाभाद्विकासिवक्त्राब्जविकासिताशाः ॥२॥

देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥ ३ ॥

आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि ।
अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलङ्घ्यवीर्ये ॥ ४ ॥

त्वं वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं परमासि माया ।
संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ५ ॥

विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत्का ते स्तुतिः स्तव्यपरापरोक्तिः ॥ ६ ॥

सर्वभूता यदा देवि [1]भुक्तिमुक्तिप्रदायिनी ।
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥ ७ ॥

[1] ०स्वर्गमुक्तिप्रदायिनी ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥ ८ ॥

कलाकाष्ठादिरूपेण परिणामप्रदायिनि ।
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥ ९ ॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ॥ १० ॥

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥ ११ ॥

शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥ १२ ॥

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ।
कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते ॥ १३ ॥

त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ।
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥ १४ ॥

मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ।
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥ १५ ॥

शङ्खचक्रगदाशार्ङ्ग[1]गृहीतपरमायुधे ।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥ १६ ॥

[1] गृहीतविविधायुधे इति शा०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे ।
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥ १७ ॥

नृसिंहरूपेणोग्रेण हन्तुं दैत्यान्कृतोद्यमे ।
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥ १८ ॥

किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ।
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥ १९ ॥

शिवदूतीस्वरूपेण [1]हतदैत्यमहाबले ।
घोररूपे महारावे नारायणि नमोऽस्तु ते ॥ २० ॥

दंष्ट्राकरालवदने शिरोमालाविभूषणे ।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥ २१ ॥

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे ।
महारात्रि महामाये नारायणि नमोऽस्तु ते ॥ २२ ॥

मेधे सरस्वति वरे भूतिबाभ्रवि तामसि ।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥ २३ ॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥ २४ ॥

एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ।
पातु नः सर्वभीति[2]भ्यः कात्यायनि नमोऽस्तु ते ॥ २५ ॥

[1] हतदैत्ये महाबले इति शा० [2] ०भूतेभ्यः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥ २६ ॥

हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव ॥ २७ ॥

असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः ।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥ २८ ॥

रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥

एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणाम् ।
रूपैरनेकैर्बहुधात्ममूर्तिं कृत्वाम्बिके तत्प्रकरोति कान्या ॥ ३० ॥

विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ।
ममत्वगर्तेऽतिमहान्धकारे विभ्रामयस्येतदतीव विश्वम् ॥ ३१ ॥

रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र ।
दावानलो यत्र भवाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम् ॥

विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम् ।
विश्वेशवन्द्या भवती भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः ॥

देवि प्रसीद परिपालय नोऽरिभीते-
नित्यं यथा सुरवधादधुनैव सद्यः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

पापानि सर्वजगतां प्रशमं नयाशु
उत्पातपाकजनितांश्च महोपसर्गान् ॥ ३४ ॥

प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥ ३५ ॥

देव्युवाच ॥ ३६ ॥

वरदाहं सुरगणा वरं यन्मनसेच्छथ ।
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥ ३६ ॥

देवा ऊचुः ॥ ३८ ॥

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेतत्त्वया कार्यमस्मद्वैरिविनाशम् ॥ ३९ ॥

देव्युवाच ॥ ४० ॥

वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ।
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ॥ ४१ ॥

नन्दगोपगृहे जाता यशोदागर्भसंभवा ।
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥ ४२ ॥

पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ।
अवतीर्य हनिष्यामि वैप्रचित्तांश्च दानवान् ॥ ४३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

भक्षयन्त्याश्च तानुग्रान्वैप्रचित्तान्महासुरान् ।
रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ॥ ४४ ॥

ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ।
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् ॥ ४५ ॥

भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ।
मुनिभिः संस्तुता भूमौ संभविष्याम्ययोनिजा ॥ ४६ ॥

ततः शतेन नेत्राणां निरीक्षिष्याम्यहं मुनीन् ।
कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ॥ ४७ ॥

ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ।
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥ ४८ ॥
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ॥ ४९ ॥

तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ।
दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति ॥ ५० ॥

पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ।
रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ॥ ५१ ॥

तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ।
भीमादेवीति विख्यातं तन्मे नाम भविष्यति ॥ ५२ ॥

यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ।
तदाहं भ्रामरं रूपं कृत्वा संख्येयषट्पदम् ॥ ५३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ।
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः ॥ ५४ ॥

इत्थं यदा यदा बाधा दानवोत्था भविष्यति ।
तदा तदावतीर्याहं करिष्याम्यरिसंक्षयम् ॥ ५५ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये नारायणीस्तुतिर्नामैकादशो ऽध्यायः ॥ ११ ॥

उवाच मन्त्राः ४ ; अर्धमन्त्रः १ ; श्लोकमन्त्राः ५० ;
एवं मन्त्राः ५५ ; एवमादितः ६३० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ द्वादशोऽध्यायः

विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥

देव्युवाच ॥ १ ॥

एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ।
तस्याहं सकलां बाधां शमयिष्याम्यसंशयम् ॥ २ ॥

मधुकैटभनाशं च महिषासुरघातनम् ।
कीर्तयिष्यन्ति ये तद्वद्वधं शुम्भनिशुम्भयोः ॥ ३ ॥

अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ।
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥ ४ ॥

न तेषां दुष्कृतं किञ्चिद्दुष्कृतोत्था न चापदः ।
न भविष्यति दारिद्र्यं न चैवेष्टवियोजनम् ॥ ५ ॥

शत्रुतो न भयं तस्य दस्युतो वा न राजतः ।
न शस्त्रानलतोयौघात्कदाचित्संभविष्यति ॥ ६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ।
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ॥ ७ ॥

उपसर्गानशेषांस्तु महामारीसमुद्भवान् ।
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ ८ ॥

यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम ।
सदा न तद्विमोक्ष्यामि सांनिध्यं तत्र मे स्थितम् ॥ ९ ॥

बलिप्रदाने पूजायामग्निकार्ये महोत्सवे ।
सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ॥ १० ॥

जानताजानता वापि बलिपूजां तथा कृताम् ।
प्रतीक्षिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतम् ॥ ११ ॥

शरत्काले महापूजा क्रियते या च वार्षिकी ।
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥ १२ ॥

सर्वाबाधाविनिर्मुक्तो धनधान्यसुतान्वितः ।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ १३ ॥

श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः ।
पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥ १४ ॥

रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते ।
नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम् ॥ १५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ।
ग्रहपीडासु चोग्रासु माहत्म्यं शृणुयान्मम ॥ १६ ॥

उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः ।
दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ १७ ॥

बालग्रहाभिभूतानां बालानां शान्तिकारकम् ।
संघातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥ १८ ॥

दुर्वृत्तानामशेषाणां बलहानिकरं परम् ।
रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥ १९ ॥

सर्वं ममैतन्माहात्म्यं मम संनिधिकारकम् ।
पशुपुष्पार्घधूपैश्च गन्धदीपैस्तथोत्तमैः ॥ २० ॥

विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् ।
अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥ २१ ॥

प्रीतिर्मे क्रियते सास्मिन्सकृदुच्चरिते श्रुते ।
श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥ २२ ॥

रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम ।
युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ॥ २३ ॥

तस्मिञ्श्रुते वैरिकृतं भयं पुंसां न जायते ।
युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥ २४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ब्रह्मणा च कृतास्तास्तु प्रयच्छन्तु शुभां मतिम् ।
अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः ॥ २५ ॥

दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः ।
सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥ २६ ॥

राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्धगतोऽपि वा ।
आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ २७ ॥

पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे ।
सर्वबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ॥ २८ ॥

स्मरन्ममैतच्चरितं नरो मुच्येत संकटात् ।
मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा ॥ २९ ॥

दूरादेव पलायन्ते स्मरतश्चरितं मम ॥ ३० ॥

ऋषिरुवाच ॥ ३१ ॥

इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ॥ ३२ ॥

पश्यतां सर्वदेवानां तत्रैवान्तरधीयत ।
तेऽपि देवा निरातङ्काः स्वाधिकारान्यथा पुरा ॥ ३३ ॥

यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः ।
दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि ॥ ३४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

जगद्विध्वंसिनि तस्मिन्महोग्रे ऽतुलविक्रमे ।
निशुम्भे च महावीर्ये शेषाः पातालमाययुः ॥ ३५ ॥

एवं भगवती देवी सा नित्यापि पुनः पुनः ।
संभूय कुरुते भूप जगतः परिपालनम् ॥ ३६ ॥

तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ।
सायाचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥ ३७ ॥

व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर ।
महाकाल्या महाकाले महामारीस्वरूपया ॥ ३८ ॥

सैव काले महामारी सैव सृष्टिर्भवत्यजा ।
स्थितिं करोति भूतानां सैव काले सनातनी ॥ ३९ ॥

भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ।
सैवाभावे तथालक्ष्मीर्विनाशायोपजायते ॥ ४० ॥

स्तुता संपूजिता पुष्पैर्धूपगन्धादिभिस्तथा ।
ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम् ॥ ४१ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
भगवतीवाक्यं नाम द्वादशोऽध्यायः ॥ १२ ॥

उवाचमन्त्रौ २ ; अर्धमन्त्रौ २ ; श्लोकमन्त्राः ३७ ;
एवं मन्त्राः ४१ ; एवमादितः ६७१ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ त्रयोदशोऽध्यायः

बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशवराभीतीर्धारयन्तीं शिवां भजे ॥

ऋषिरुवाच ॥ १ ॥

एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम् ।
एवंप्रभावा सा देवी ययेदं धार्यते जगत् ॥ २ ॥

विद्या तथैव क्रियते भगवद्विष्णुमायया ।
तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ।
मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे ॥ ३ ॥

तामुपैहि महाराज शरणं परमेश्वरीम् ।
आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥ ४ ॥

मार्कण्डेय उवाच ॥ ६ ॥

इति तस्य वचः श्रुत्वा सुरथः, [1]स नराधिपः ।
प्रणिपत्य महाभागं तमृषिं संशितव्रतम् ॥ ७ ॥

निर्विण्णोऽतिममत्वेन राज्यापहरणेन च ।
जगाम सद्यस्तपसे स च वैश्यो महामुने ॥ ८ ॥

[1] क्षत्त्रियर्षभः च०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

संदर्शनार्थमम्बाया नदीपुलिनमास्थितः ।
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥ ९ ॥

तौ तस्मिन्पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥ १० ॥

अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ।
निराहारौ [1]यताहारौ तन्मनस्कौ समाहितौ ॥ ११ ॥

ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ।
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ १२ ॥

परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥ १३ ॥

देव्युवाच ॥ १४ ॥

यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन ।
मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत् ॥ १५ ॥

मार्कण्डेय उवाच ॥ १६ ॥

ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ।
अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥ १७ ॥

सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ।
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ॥ १८ ॥

[1] यतात्मानौ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

देव्युवाच ॥ १९ ॥

स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥ २० ॥

हत्वा रिपूनस्खलितं तव तत्र भविष्यति ॥ २१ ॥

मृतश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः ॥ २२ ॥

सावर्णिको [1]नाम मनुर्भवान्भुवि भविष्यति ॥ २३ ॥

वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः ॥ २४ ॥

तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥ २५ ॥

मार्कण्डेय उवाच ॥ २६ ॥

इति दत्त्वा तयोर्देवी यथाभिलषितं वरम् ॥ २७ ॥

बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ।
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥ २८ ॥

सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ २९ ॥

सावर्णिर्भविता मनुः, ओम् ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये सुरथवैश्ययोर्वरप्रदानं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

उवाचमन्त्राः ६ ; अर्धमन्त्राः ७ ; श्लोकमन्त्राः १६ ;
एवं मन्त्राः २९ ; एवमादितः ; ७०० ॥

---

[1] मनुर्नाम० शा०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथोत्तरान्यासाः

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणभुसुण्डी परिघायुधा ॥
ऐं हृदयाय नमः ॥

शूलेन पाहि नो देवी पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्या निः स्वनेन च ॥
ह्रीं शिरसे स्वाहा ॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वती ॥
क्लीं शिखायै वषट् ॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यन्तघोराणि तै रक्षास्मांस्तथा भुवम् ॥
ऐं कवचाय हुम् ॥

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मात्रक्ष सर्वतः ॥
ह्रीं नेत्रत्रयाय वौषट् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥

क्लीं अस्त्राय फट् ॥

ओं भूर्भुवःस्वरोमिति दिग्विमोचः ध्यानम्—

खड्गं चक्रगदेषुचापपरिघाञ्शूलं भुशुण्डीं शिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥

अक्षस्रक्परशुं गदेषु कुलिशं पद्मं धनुः कुण्डिकां
दण्डं शक्तिमसिं च चर्मजलजं घण्टां सुराभाजनम् ।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रदाम् ।
गौरीदेहसमुद्भवां त्रिनयनामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनु भजे शुम्भादिदैत्यार्दिनीम् ॥

विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
विभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥

श्रीचण्डिकायै नमः ; समस्तोपचारपूजां समर्पयामि ॥

अथ देवीसूक्तम् (पौराणिकम्)

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ १ ॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥ २ ॥

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ ३ ॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ ४ ॥

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ ५ ॥

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ६ ॥

या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ८ ॥

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ९ ॥

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १० ॥

या देवी सर्वभूतेषु छायारूपेण संस्थिता ।
नमस्तस्यै नमस्तंस्यै नमस्तस्यै नमो नमः ॥ ११ ॥

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १२ ॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तयै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १३ ॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।
नमस्तस्यै नमंस्तस्यै नमस्तस्यै नमो नमः ॥ १४ ॥

या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १५ ॥

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १७ ॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १८ ॥

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १९ ॥

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २० ॥

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २१ ॥

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २२ ॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २३ ॥

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २४ ॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २६ ॥

इन्द्रियाणामधिष्ठात्री भूतानामखिलेषु या ।
भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥ २७ ॥

चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २८ ॥

स्तुता सुरैः पूर्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥ २९ ॥

या सांप्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशं च सुरैर्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः ॥ ३० ॥

[इति देवीसूक्तं पठित्वा अष्टोत्तरशतं नवार्णमनुं जपित्वा—

'गुह्यातिगुह्यगोप्त्रि त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥' इति ।

'अनेन देवीमाहात्म्यपारायणेन भगवती सर्वात्मिका श्रीचण्डिका तृप्यतु' इति संप्रार्थ्य देव्या वामहस्ते जपं निवेदयेत् ॥]

इति देवीसूक्तम् (पौराणिकम्)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ देवीसूक्तम् (वैदिकम्)

अहं रुद्रेभिरित्यष्टर्चस्य सूक्तस्य वागाम्भृणी ऋषिः, श्री-आदिशक्तिर्देवता, त्रिष्टुप्छन्दः, द्वितीया जगती, श्रीजगदम्बा-प्रीत्यर्थे सप्तशतीजपान्ते जपे विनियोगः ।

ओं अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥

अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये ३ यजमानाय सुन्वते ॥

अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ॥

मयासो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं श्रृणोत्युक्तम् ।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुतः श्रद्धिवं ते वदामि ॥

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥

अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्त वा उं ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्व१न्तः समुद्रे ।
ततो वितिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि ॥

अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यै तावती महिना संबभूव ॥ ८ ॥

[इति देवीसूक्तं पठित्वा अष्टोत्तरशतं नवार्णमनुं जपित्वा—

'गुह्यातिगुह्यगोप्त्रि त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥' इति ।

'अनेन देवीमाहात्म्यपारायणेन भगवती सर्वात्मिका श्रीचण्डिका तृप्यतु' इति संप्रार्थ्य देव्या वामहस्ते जपं निवेदयेत् ॥]

इति देवीसूक्तम् (वैदिकम्)

देवीसूक्तम् (तान्त्रिकम्)

अस्य श्रीदेवीसूक्तमहामन्त्रस्य व्याघ्राम्बरधरो रूढेश्वरऋषिः, त्रिष्टुप्छन्दः, आत्मा देवता । महाकालीमहालक्ष्मीमहासरस्वती-प्रसादसिध्यर्थे जपे विनियोगः । ह्रामित्यादिषडङ्गन्यासः । ध्यानम्—

शङ्खं चक्रं कपालं त्रिशिखरमुसलौ तर्जनीं चापि बाणौ
बिभ्राणां बाहुदण्डैः शशिदलविलसत्पिङ्गकोटीरभाराम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

देवीं दिव्याङ्गरागां विकटमुखलसद्घोरदंष्ट्रां त्रिनेत्रां
दुर्गां भोगीन्द्रभूषां मुनिविबुधनुतां घोररूपां नमामि ॥

लमित्यादिपञ्चपूजा ॥

राजोवाच—

मुने कथय सर्वज्ञ भूयः किंचिदनुत्तमम् ।
तत्त्वमेतस्य सर्वस्य येन सिद्धिरवाप्यते ॥ १ ॥

ऋषिरुवाच—

भूयः शृणु महाभाग देवीमाहात्म्यमुत्तमम् ।
विना येन स्तवश्चायं निर्जीवो नृपनन्दन ॥ २ ॥

दृष्ट्वा शुम्भं विनिहतं दारुणं लोककण्टकम् ।
आजग्मुः परमानन्दं ब्रह्मविष्णुमहेश्वराः ॥ ३ ॥

आज्ञामादाय देवेश्याः दर्शनं कर्तुमागताः ।
बद्धाञ्जलिपुटः साक्षात्तुष्टुवुः क्रमशः शिवाम् ॥ ४ ॥

ब्रह्मा सरस्वतीसूक्तं लक्ष्मीसूक्तं जनार्दनः ।
सूक्तं तथा महाकाल्याः शंकरः स्वयमब्रवीत् ॥ ५ ॥

ब्रह्मोवाच—

अजां पुराणीममरां सनातनीं
चतुर्भुजां पुस्तकमक्षधारिणीम् ।
वराभयाभ्यामनुशोभिहस्तां
नमामि तां जाड्यजराविनाशिनीम् ॥ ६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सरस्वतीं त्वामनुनौमि वाचं वाचः प्रदां हंसवराधिरूढाम् ।
मुक्तामणिद्योतितकण्ठहारां भाग्यैकलभ्यां परमां पवित्राम् ॥७॥

श्रीकण्ठशक्तित्रयशोभमानां दशारतुर्येण कृतानुरूपाम् ।
पञ्चारवासां धृतखड्गहस्तां सरस्वतीं त्वां प्रणमामि देवीम् ॥

कलाढ्ययन्त्रां मणिकोटिहारां विहारयन्त्रां विमलैकशोभाम् ।
स्वच्छावदातस्फटिकानुरूपां सरस्वतीं त्वां प्रणमामि देवीम् ॥

वाक्कायकामैः परमैः पवित्रैः स्मरामि तां ह्रींवरदानदक्षैः ।
बीजैरमीभिः कविबीजयुक्तैः क्लींयुग्ममिश्रैरिति मन्त्रराजः ॥

एकेन चैकेन च युग्मकेन द्वाभ्यामथैकेन तथैव शेषैः ।
कराङ्कक्लृप्तैः परमोत्तमेयं निहन्ति पापानि च साधकानाम् ॥

हठेन वै श्रृङ्खलया च दृष्ट्या विधातृपत्न्या च तथैव वाचा ।
श्रीःकीर्तिब्राह्म्यादिकशोभया च न्यासैरमीभिः परितोषशंसुः ॥

द्रव्येण होमात्सकलार्थसिद्धिः सुकिंशुकैर्वागपि सिद्धिमिच्छेत् ।
तत्साहचर्येण रमानिवासः सुपायसेनापि च वेदसिद्धिः ॥ १३ ॥

न चाम्ब ते महिमानं वदामः सरस्वतीं त्वां सुरलोकमध्ये ।
जानन्ति किं बुद्बुदभूमितोये जडा वयं ब्रह्महरीशमुख्याः ॥

तथैव वाचा वचसं वदामो जग्राह शक्त्या च तथैव जीवः ।
पश्यामहे त्वां च मातर्महेशि स्पृशामि साक्षात्त्वयि संयुतायाम् ॥

९

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

स्वादुं विदामस्तव शक्तियोगाद्वृह्णीमहे तव शक्त्या महेशि ।
गच्छामहे तव शक्तिप्रभावादानन्दयुक्तास्तव संनिवेशात् ॥

आत्मा मनस्त्वं त्वमेवापि देहस्त्वमेव चैवेन्द्रियपञ्चतत्त्वम् ।
त्वमेव वै विषयाः शब्दमुख्याः परापरेशी परमा त्वमेव ॥१७॥

रविश्च ते चन्द्रमाश्च ते तारकाश्च ते भूमिश्च ते जलं च ते तेजश्च ते वायुश्च ते व्योमा च ते शब्दश्च ते स्पर्शश्च ते रूपं च ते रसश्च ते गन्धश्च ते घ्राणश्च ते प्राणश्च तेऽपानश्च ते व्यानश्च ते उदानश्च ते समानश्च ते नागश्च ते कूर्मश्च ते कृकरश्च ते देवदत्तश्च ते धनंजयश्च ते भूतात्मा च ते आत्मा च तेऽन्तरात्मा च ते परमात्मा च ते ज्ञानात्मा च ते विद्यात्मा च ते सर्वात्मा च ते त्वय्येव चित्तं विनिवेश्यताम् ॥ १८ ॥

यथा न चाण्डं भुवनानि जीवो नाहं न विष्णुर्न च पार्वतीशः ।
न चेश्वरेणापि सदाशिवेन त्वमेव चापि स्तुविता भविष्यसि ॥

कालस्त्वमेवासि जगत्त्रयाणां स्वभाववीर्यादिकरं त्वमेव ।
त्वमेव विश्वं परमात्मशक्तिर्नमामि ते पादमहं सरस्वति ॥२०॥

त्वं देववाणी निखिलाश्च वेदास्त्वं ब्रह्मशक्तिश्च यथार्थशक्तिः ।
त्वं ब्रह्मविद्यासि परापरेशी त्वां ब्रह्मशक्तिं शरणं प्रपद्ये ॥२१॥

सूक्तं त्वदीयं सुभगे सरस्वति प्रातश्च मध्ये ऽहनि चैव सायम् ।
पठन्ति ये श्रद्धया पूतचित्तास्ते भोगमोक्षौ सहसा लभन्ते ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

न ते कुयोनिं न दरिद्रतां च नाध्यात्मतापं च न संलभन्ते ।
त एव धन्याश्च त एव पूज्याः सर्वत्र मानो भवतीह तेषाम् ॥

इदं पुराणं विरजं सुधामयं तत्त्वादिभूतं जगतां त्रयाणाम् ।
ते प्राप्नुवन्ति प्रकटप्रभावां त्वां विश्वयोनिं शरणं प्रपद्ये ॥

ऋषिरुवाच—

स्तुत्यानया वेदवाण्या सर्वसारस्वरूपया ।
प्रसन्ना देवदेवेशी महापूर्वा सरस्वती ॥ २५ ॥

आविर्भूता महाद्देवी ब्रह्मतोषैककारिणी ।
उवाच वचनं दिव्यं ब्रह्मानन्दप्रदायकम् ॥ २६ ॥

सरस्वत्युवाच—

स्तुत्यानया तव ब्रह्मन्भृशं तोषमुपागता ।
प्रीतास्मि व्रियतां देव वरः संतोषकारकः ॥ २७ ॥

ब्रह्मोवाच—

अन्तर्ध्यानं महादेवि दृढं भवतु सर्वदा ।
एष एव वरः साक्षादुत्तमो व्रियते मया ॥ २८ ॥

स्वसूक्तेनापि देवेशि तेजो दिव्यं विधीयताम् ।
येन कार्याणि सिद्ध्यन्ति साधकानां महात्मनाम् ॥२९॥

सरस्वत्युवाच—

सर्वदा ते मनो देव कुलधर्मे सुपूजितम् ।
दृढं भवतु सूक्तं च प्रसादान्मे परंतप ॥ ३० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सर्वसिद्धिप्रदं चास्तु परमानन्ददायकम् ।
विना सूक्तं पठेद्यस्तु स्तोत्रं सप्तशतीति च ॥ ३१ ॥

मातृगामी स विज्ञेयो नरकावासतत्परः ।
ममैवाज्ञापराधीनो ब्रह्मघ्नानां गतिं व्रजेत् ॥ ३२ ॥

ऋषिरुवाच—

एवमुक्त्वा वचो देवी तूष्णीमासीन्नृपोत्तम ।

इति सरस्वतीसूक्तम्

अथाञ्जलिं समाधाय हरिः प्रोवाच विश्वकृत् ॥ ३३ ॥

हरिरुवाच—

परापरेशां जगदादिभूतां वरां वरेण्यां वरदां वरिष्ठाम् ।
परेश्वरीं त्वां बहुवाक्प्रगीतां त्वां विश्वयोनिं शरणं प्रपद्ये ॥३४॥

श्रियं समस्तां निखिलाधिवासां महासुलक्ष्मीं धरणीधराणाम् ।
अनादिमादिं परमात्मरूपां त्वां विश्वयोनिं शरणं प्रपद्ये ॥३५॥

एकामनेकां विविधां सकार्यां सुकारिणीं सद्रसरूपिणीं च ।
रूपामरूपां च शिवां शिवप्रदां त्वां विश्वयोनिं शरणं प्रपद्ये ॥

सर्वाश्रयां सर्वजगन्निवासां श्रीमन्महालक्ष्मिमनादिदेवीम् ।
शक्तिस्वरूपां च शिवस्वरूपां त्वां विश्वयोनिं शरणं प्रपद्ये ॥

कामाभिधां श्रीमधिवासभूतां ह्रींरूपिणीं मन्मथबीजयुक्ताम् ।
कलाढ्यबीजां परमार्थसंज्ञां त्वां विश्वयोनिं शरणं प्रपद्ये ॥३८॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

वैश्वानरश्रीसहितेन देवीं श्रीमन्त्रराजेन विराजमानाम् ।
सर्वार्थदात्रीं परमां पवित्रां त्वां विश्वयोनिं शरणं प्रपद्ये ॥३९॥

त्रिकोणपञ्चारनृयुग्मभावां षट्कोणमिश्रां द्विदशारयुक्ताम् ।
अष्टारचक्राधिनिवासभूतां त्वां विश्वयोनिं शरणं प्रपद्ये ॥४०॥

पुनर्दशारद्वितयेन युक्तां पञ्चारकोणाञ्चितभूगृहां च ।
यन्त्राधिवासामपि यन्त्ररूपां त्वां विश्वयोनिं शरणं प्रपद्ये ॥४१॥

संभावितां सर्वदा ध्यानगम्यां सर्वस्वरूपामपि सर्वशोभाम् ।
सर्वाक्षरन्यासवशां वरिष्ठां त्वां विश्वयोनिं शरणं प्रपद्ये ॥ ४२ ॥

सृष्टिस्थितिप्रलयैः सर्वबीजैर्न्यासं विधाय प्रजपन्ति ये त्वाम् ।
त एव राजेन्द्र निघृष्टपापा विद्याधरेन्द्रादियशो लभन्ते ॥४३॥

संपूज्य यन्त्रं विधिना महेशि न्यासैः सुपूतां परमैः सुभाग्याः ।
जपन्ति ये त्वां विविधार्थदात्रीं त एव धन्याः कुलमार्गनिष्ठाः ॥

जानन्ति ते किं पशवः कुपापाः ब्रह्मादिगीतं महिमानं महेशि ।
केचिन्महान्तो निजधर्मलाभाज्जानन्ति ते देवि परं सुधाम ॥

विधाय कुण्डं विधिना स्थण्डिलं वा सौगन्धिहोमं सकलं प्रकुर्वते ।
त्वत्संतोषाज्जायते भाग्यमत्र तेषां सुरेशैरपि दूरगम्यम् ॥ ४६ ॥

पुनः स्तुवन्ति प्रयता विश्वसाराः स्तोत्रैरुदारैः कुलयोगयुक्ताः ।
त एव धन्याः परमर्द्धिभाजो भोगश्च मोक्षश्च करस्थ एषाम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ऋषिरुवाच—

इति स्तुत्यवसाने च महालक्ष्मीं ददर्श सः ।
चतुर्भुजां त्रिनयनां महिषासुरघातिनीम् ॥ ४८ ॥
अथ श्रीमन्महालक्ष्मीः प्रसन्ना स्तुतिगौरवात् ।
उवाच तं सुशोभाढ्या नारायणमजं विभुम् ॥ ४९ ॥

देव्युवाच—

वरं वरय देवेश नारायण सनातन ।
दास्याम्यहं प्रदातव्यं तव स्तुत्या वशीकृता ॥ ५० ॥

नारायण उवाच—

मातः परमकल्याणि महालक्ष्मि वरप्रदे ।
कुलाचारे मनो मेऽस्तु सुदृढं त्वदनुग्रहात् ॥ ५१ ॥
तव सूक्तं तु सकलं भवतु प्रीतिकारकम् ।

देव्युवाच—

एवमस्तु महाभाग नारायण सनातन ॥ ५२ ॥
सूक्तमेतद्विना यस्तु पठेत्सप्तशतीं नरः ।
स याति च महाघोरं नरकं दारुणं बिलम् ॥ ५३ ॥
लिप्यते परमैः शापैः मम कोपविघूर्णितः ।
लक्ष्मीसूक्तं विना सप्तशतीस्तोत्रं न सिद्ध्यति ॥ ५४ ॥

ऋषिरुवाच—

एवमुक्त्वा वचो देवी तूष्णींभावं गता नृप ।

इति लक्ष्मीसूक्तम्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ततोऽञ्जलिं समाधाय स शिवः सुमुदान्वितः ॥ ५५ ॥

तुष्टाव वाग्भिर्दिव्याभिर्महाकालीं महेश्वरीम् ।
वेदवाग्भिः सुतत्त्वाभिर्लोकानां हितकाम्यया ॥ ५६ ॥

शिव उवाच—

शिवां भवानीं विविधार्थभावां कालीं कलामालिनिविश्ववन्द्याम् ।
कपालखट्वाङ्गधरां नृमुण्डमालाविभूषां मृगचर्मशोभाम् ॥ ५७ ॥

सुशुष्कमांसाढ्यशवासनस्थां विभीषणां भीषयतीं सुरारीन् ।
रक्तप्रियां मांसमदांवघूर्णां कालीं शरण्यां शरणं व्रजामि ॥ ५८ ॥

सुघोरबीजं च कवीश्वरं च चिन्तामणिं कुञ्चितकामराजम् ।
विद्यैव विद्यादि च कारमाजं कामः कलामालिनिकामराजम् ॥

वह्नेर्वधूर्मन्त्रराजे महेशि विश्वं पुनातीश्वरवेदवन्द्ये ।
मन्त्रेण चानेन च सर्वकामाः सिद्ध्यन्ति वै सर्वजगन्निवासे ॥६०॥

पञ्चारयुग्मं च त्रिकोणयुग्मं पुनश्च पञ्चारयुगेन बद्धम् ।
कलाष्टकोष्ठं किल भूगृहं च यन्त्रेश्वरं ते पदपद्मवासम् ॥ ६१ ॥

संपूज्य यन्त्रं तव विश्वनायिके निष्पापिनस्ते सहसा भवन्ति ।
ये साधकास्ते ऽनुसरन्ति मार्गं कुलानुवृत्तं परमं पवित्रम् ॥६२॥

ते सिद्धिमृद्धिं च यशोऽनुगम्यं नरान्वशीकृत्य भवन्ति भूपाः ।
समस्तमन्त्रेण विधाय चाङ्गं न्यासादिकं भक्तिसुभावयुक्ताः ॥६३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ते किंकरीकृत्य गृणन्ति देवानीशे जगत्येकविभूतियुक्ते ।
वदामि नान्यं न शृणोमि चान्यं गृणामि नान्यं न विचिन्तयामि ॥
स्मरामि नान्यं न भजामि नान्यं ध्यायामि नान्यं न वितर्कयामि ।
गच्छामि नान्यं तव पादमन्तरा त्वां विश्वयोनिं शरणं प्रपद्ये ॥
ईशानदैवत्यमिहासि देवीं नाराधयन्तीह च ये कुबुद्धयः ।
अन्धंतमस्ते प्रविशन्ति पापाः संदर्शनं मास्तु दुरात्मनां ते ॥

ऋषिरुवाच—

इति वाक्यं समाकर्ण्य परमामृतसंमितम् ।
प्रसन्नाभून्महाकाली व्रियतामीप्सितो वरः ॥ ६७ ॥

इत्युवाच विशालाक्षी शंभोरानन्ददायिनी ।
प्रसन्ना परमाह्लादसंयुता शिवभाषणात् ॥ ६८ ॥

देव्युवाच—

व्रियतां मनसोऽभीष्टो वरो जगति दुर्लभः ।
अदेयमपि दास्यामि तव स्तुत्या वशीकृता ॥ ६९ ॥

ईश्वर उवाच—

कुलाचाररता देवि मतिर्मेऽस्तु कदाचन ।
शिथिला न तु देवेशि सूक्तं च सफलं तव ॥ ७० ॥

ऋषिरुवाच—

एवमस्त्विति चोक्त्वा हि तिस्रो देव्यः सनातनाः ।
अन्तर्धिमापुः परमा ह्यम्बिकैव स्थिताभवत् ॥ ७१ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अथ तां स्तुवतो देवान्प्रोवाच वचनं मुदा ।
संतोषयन्ती च मुहुर्लोकानुग्रहकारिणी ॥ ७२ ॥

देव्युवाच—

शृणुध्वं प्रीतिसंयुक्ता ब्रह्मविष्णुमहेश्वराः ।
देवीसूक्तं परं ध्येयं भूयात्सर्वार्थदायकम् ॥ ७३ ॥

देवीसूक्तं विना देवि ये च सप्तशतीं नराः ।
श्रोष्यन्ति च पठिष्यन्ति तेषां शापः पदे पदे ॥ ७४ ॥

देवीसूक्तं विना पाठो ह्यरण्ये रोदनं यथा ।
स्तोत्रत्रयेण चानेन पूर्णं स्तोत्रं भविष्यति ॥ ७५ ॥

त्रिमूर्तय ऊचुः—

या च सप्तशतीस्तोत्रफलस्तुतिरिहोदिता ।
तां समाकर्ण्य जीवानां विश्वासो जायते भृशम् ॥ ७६ ॥

ऋषिरुवाच—

इति वाक्यं समाकर्ण्य ब्रह्मविष्णुमहेश्वराः ।
फलश्रुतिमथोचुस्ते स्तोत्रस्यास्य महामते ॥ ७७ ॥

इति कालीसूक्तम्

इति श्रीरुद्रयामले स्वरघण्टातन्त्रे देवीमाहात्म्ये सप्तशतीप्रशंसायां
देवीसूक्तं नाम चतुर्थोऽध्यायः

इति देवीसूक्तम् (तान्त्रिकम्)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

प्राधानिकरहस्यम्

अस्य श्रीरहस्यत्रयस्य ब्रह्मविष्णुरुद्रा ऋषयः, अनुष्टुप् छन्दः, महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः; महालक्ष्मी-बीजम्, श्रीः शक्तिः, दुर्गाकीलकम्। अभीष्टफलसिद्धयर्थे जपे विनियोगः॥

राजोवाच—

भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः।
एतेषां प्रकृतिं ब्रह्मन्प्रधानं वक्तुमर्हसि॥ १॥

आराध्यं यन्मया देव्याः स्वरूपं येन तद्द्विज।
विधिना ब्रूहि सकलं यथावत्प्रणतस्य मे॥ २॥

ऋषिरुवाच—

इदं रहस्यं परममनाख्येयं प्रचक्षते।
भक्तोऽसीति न मे किंचित्तवावाच्यं नराधिप॥ ३॥

सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी।
लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता॥ ४॥

मातुलिङ्गं गदां खेटं पानपात्रं च बिभ्रती।
नागं लिङ्गं च योनिं च बिभ्रती नृप मूर्धनि॥ ५॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा ।
शून्यं तदखिलं स्वेन पूरयामास तेजसा ।। ६ ।।

शून्यं तदखिलं लोकं विलोक्य परमेश्वरी ।
बभार रूपमपरं तमसा केवलेन हि ।। ७ ।।

सा भिन्नाञ्जनसंकाशा दंष्ट्राञ्चितवरानना ।
विशाललोचना नारी बभूव तनुमध्यमा ।। ८ ।।

खड्गपात्रशिरः खेटैरलंकृतचतुर्भुजा ।
कबन्धहारं शिरसा बिभ्राणा शिरसां स्रजम् ।। ९ ।।

सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा ।
नामकर्म च मे मातर्देहि तुभ्यं नमो नमः ।। १० ।।

तां प्रोवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम् ।
ददामि तव नामानि यानि कर्माणि तानि ते ।। ११ ।।

महामाया महाकाली महामारी क्षुधा तृषा ।
निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया ।। १२ ।।

इमानि तव नामानि प्रतिपाद्यानि कर्मभिः ।
एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम् ।।

तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरं नृप ।
सत्त्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधौ ।। १४ ।।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अक्षमालाङ्कुशधरा वीणापुस्तकधारिणी ।
सा बभूव वरा नारी नामान्यस्यै च सा ददौ ॥ १५ ॥

महाविद्या महावाणी भारती वाक्सरस्वती ।
आर्या ब्राह्मी महाधेनुर्वेदगर्भा सुरेश्वरी ॥ १६ ॥

अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम् ।
युवां जनयतां देव्यौ मिथुने स्वानुरूपतः ॥ १७ ॥

इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम् ।
हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ॥ १८ ॥

ब्रह्मन्विधे विरिञ्चेति धातरित्याह तं नरम् ।
श्रीः पद्मे कमले लक्ष्मीत्याह माता स्त्रियं च ताम् ॥ १९ ॥

महाकाली भारती च मिथुने सृजति स्म ह ।
एतयोरपि रूपाणि नामानि च वदामि ते ॥ २० ॥

नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम् ।
जनयामास पुरुषं महाकाली सितां स्त्रियम् ॥ २१ ॥

स रुद्रः शंकरः स्थाणुः कपर्दी च त्रिलोचनः ।
त्रयी विद्या कामधेनुः सा स्त्री भाषा स्वराक्षरा ॥ २२ ॥

सरस्वतीं स्त्रियं गौरीं कृष्णं च पुरुषं नृप ।
जनयामास नामानि तयोरपि वदामि ते ॥ २३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः ।
उमा गौरी सती चण्डी सुन्दरी सुभगा शिवा ॥ २४ ॥
एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे ।
चक्षुष्मन्तोऽनुपश्यन्ति नेतरेऽतद्विदो जनाः ॥ २५ ॥
ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रयीम् ।
रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् ॥ २६ ॥
स्वरया सह संभूय विरिञ्चोऽण्डमजीजनत् ।
बिभेद भगवान्रुद्रस्तद्गौर्या सह वीर्यवान् ॥ २७ ॥
अण्डमध्ये प्रधानादि कार्यजातमभून्नृप ।
महाभूतात्मकं सर्वं जगत्स्थावरजङ्गमम् ॥ २८ ॥
पुपोष पालयामास तल्लक्ष्म्या सह केशवः ।
संजहार जगत्सर्वं सह गौर्या महेश्वरः ॥ २९ ॥
महालक्ष्मीरेव माता राजन्सर्वेश्वरेश्वरी ।
निराकारा च साकारा सैव नानाभिधानभृत् ॥ ३० ॥
नामान्तरैर्निरूप्यैषा नाम्ना नान्येन केनचित् ।

इति प्राधानिकरहस्यम

अथ वैकृतिरहस्यम्

ऋषिरुवाच—

त्रिगुणा तामसी देवी सात्त्विकी या त्रिधोदिता ।
सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्यते ॥ १ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

योगनिद्रा हरेरुक्ता महाकाली तमोगुणा ।
मधुकैटभनाशार्थं यां तुष्टावाम्बुजासनः ॥ २ ॥

दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ।
विशालया राजमाना त्रिंशल्लोचनमालया ॥ ३ ॥

स्फुरद्दशनदंष्ट्राभा भीमरूपापि भूमिप ।
रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियाम् ॥ ४ ॥

खड्गबाणगदाशूलशङ्खचक्रभुसुण्डिभृत् ।
परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ॥ ५ ॥

एषा सा वैष्णवी माया महाकाली दुरत्यया ।
आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरम् ॥ ६ ॥

सर्वदेवशरीरेभ्यो याविर्भूतामितप्रभा ।
त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी ॥ ७ ॥

श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला ।
रक्तमध्या रक्तपादा नीलजङ्घोरुरुन्मदा ॥ ८ ॥

सुचित्रजघना चित्रमाल्याम्बरविभूषणा ।
चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी ॥ ९ ॥

अष्टादशभुजा पूज्या सा सहस्रभुजा सती ।
आयुधान्यत्र वक्ष्यन्ते दक्षिणाधः करक्रमात् ॥ १० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ।
चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः ।। ११ ।।

शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः ।
अलंकृतभुजामेभिरायुधैः कमलासनाम् ।। १२ ।।

सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ।
पूजयेत्सर्वदेवानां स लोकानां प्रभुर्भवेत् ।। १३ ।।

गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रया ।
साक्षात्सरस्वती प्रोक्ता शुम्भासुरनिवर्हिणी ।। १४ ।।

दधौ चाष्टभुजा बाणमुसले शूलचक्रभृत् ।
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ।। १५ ।।

एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ।
निशुम्भमथनी देवी शुम्भासुरनिबर्हिणी ।। १६ ।।

इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव ।
उपासनं जगन्मातुः पृथगासां निशामय ।। १७ ।।

महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती ।
दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् ।। १८ ।।

विरिञ्चिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे ।
वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयम् ।। १९ ।।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अष्टादशभुजा मध्ये वामे चास्या दशानना ।
दक्षिणेऽष्टभुजा लक्ष्मीर्महतीति समर्चयेत् ॥ २० ॥

अष्टादशभुजा चैषा यदा पूज्या नराधिप ।
दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा ॥ २१ ॥

कालमृत्यू च संपूज्यौ सर्वारिष्टप्रशान्तये ।
यदा चाष्टभुजा पूज्या शुम्भासुरनिबर्हिणी ॥ २२ ॥

नवास्याः शक्तयः पूज्यास्तथा रुद्रविनायकौ ।
नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत् ॥ २३ ॥

अवतारत्रयार्चायां स्तोत्रमन्त्रास्तदाश्रयाः ।
अष्टादशभुजा चैषा पूज्या महिषमर्दिनी ॥ २४ ॥

महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती ।
ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥ २५ ॥

महिषान्तकरी येन पूजिता स जगत्प्रभुः ।
पूजयेज्जगतां धात्रीं चण्डिकां भक्तवत्सलाम् ॥ २६ ॥

अर्घ्यादिभिरलंकारैर्गन्धपुष्पैस्तथाक्षतैः ।
धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥ २७ ॥

रुधिराक्तेन बलिना मांसेन सुरया नृप ।
प्रणामाचमनीयेन चन्दनेन सुगन्धिना ॥ २८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

सकर्पूरैश्च ताम्बूलैर्भक्तिभावसमन्वितैः ।
वामभागे ऽग्रतो देव्याश्छिन्नशीर्षं महासुरम् ॥ २९ ॥

पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया ।
दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम् ॥ ३० ॥

वाहनं पूजयेद्देव्या धृतं येन चराचरम् ।
यः कुर्यात्प्रयतो धीमांस्तस्या एकाग्रमानसः ॥ ३१ ॥

ततः कृताञ्जलिर्भूत्वा स्तुवीत चरितैरिमैः ।
एकेन वा मध्यमेन नैकेनेतरयोरिह ॥ ३२ ॥

चरितार्धं तु न जपेज्जपंश्छिद्रमवाप्नुयात् ।
प्रदक्षिणनमस्कारान्कृत्वा मूर्ध्नि कृताञ्जलिः ॥ ३३ ॥

क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतन्द्रितः ।
प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा ॥ ३४ ॥

जुहुयात्स्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः ।
नमो नमः पदैर्देवीं पूजयेत्सुसमाहितः ॥ ३५ ॥

प्रयतः प्राञ्जलिः प्रह्वः प्रणम्यारोप्य चात्मनि ।
सुचिरं भावयेदीशां चण्डिकां तन्मयो भवेत् ॥ ३६ ॥

एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीम् ।
भुक्त्वा कामान्यथाकामं देवीसायुज्यमाप्नुयात् ॥ ३७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

यो न पूजयते नित्यं चण्डिकां भक्तवत्सलाम् ।
भस्मीकृत्यास्य पुण्यानि निर्दहेत्परमेश्वरी ॥ ३८ ॥
तस्मात्पूजय भूपाल सर्वलोकमहेश्वरीम् ।
यथोक्तेन विधानेन चण्डिकां सुखमाप्स्यसि ॥ ३९ ॥

इति वैकृतिरहस्यं समाप्तम् ॥

अथ मूर्तिरहस्यम्

ऋषिरुवाच—

नन्दा भगवती नाम या भविष्यति नन्दजा ।
सा स्तुता पूजिता भक्त्या वशीकुर्याज्जगत्त्रयम् ॥ १ ॥
कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा ।
देवी कनकवर्णाभा कनकोत्तमभूषणा ॥ २ ॥
कमलाङ्कुशपाशाब्जैरलंकृतचतुर्भुजा ।
इन्दिरा कमला लक्ष्मीः सा श्रीरुक्माम्बुजासना ॥ ३ ॥
या रक्तदन्तिका नाम देवी प्रोक्ता मयानघ ।
तस्याः स्वरूपं वक्ष्यामि शृणु सर्वभयापहम् ॥ ४ ॥
रक्ताम्बरा रक्तवर्णा रक्तसर्वाङ्गभूषणा ।
रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा ॥ ५ ॥
रक्ततीक्ष्णनखा रक्तदशना रक्तदन्तिका ।
पतिं नारीवानुरक्ता देवी भक्तं भजेज्जनम् ॥ ६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

वसुधेव विशाला सा सुमेरुयुगलस्तनी ।
दीर्घौ लम्बावतिस्थूलौ तावतीव मनोहरौ ॥ ७ ॥
कर्कशावतिकान्तौ तौ सर्वानन्दपयोनिधी ।
भक्तान्संपाययेद्देवी सर्वकामदुघौ स्तनौ ॥ ८ ॥
खड्गं पात्रं च मुसलं लाङ्गलं च बिभर्ति सा ।
आख्याता रक्तचामुण्डा देवी योगीश्वरीति च ॥ ९ ॥
अनया व्याप्तमखिलं जगत्स्थावरजङ्गमम् ।
इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम् ॥ १० ॥
अधीते य इमं नित्यं रक्तदन्त्या वपुःस्तवम् ।
तं सा परिचरेद्देवी पतिं प्रियमिवाङ्गना ॥ ११ ॥
शाकम्भरी नीलवर्णा नीलोत्पलविलोचना ।
गम्भीरनाभिस्त्रिवलीविभूषिततनूदरी ॥ १२ ॥
सुकर्कशसमोत्तुङ्गवृत्तपीनघनस्तनी ।
मुष्टिं शिलीमुखापूर्णं कमलं कमलालया ॥ १३ ॥
पुष्पपल्लवमूलादि फलाढ्यं शाकसंचयम् ।
काम्यानन्तरसैर्युक्तं क्षुत्तृण्मृत्युज्वरापहम् ॥ १४ ॥
कार्मुकं च स्फुरत्कान्ति बिभ्रती परमेश्वरी ।
शाकम्भरी शताक्षी सा सैव दुर्गा प्रकीर्तिता ॥ १५ ॥
विशोका दुष्टदमनी शमनी दुरितापदाम् ।
उमा गौरी सती चण्डी कालिका सापि पार्वती ॥ १६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

शाकम्भरीं स्तुवन्ध्यायञ्जपन्संपूजयन्नमन् ।
अक्षय्यमश्नुते शीघ्रमन्नपानामृतं फलम् ॥ १७ ॥

भीमापि नीलवर्णा सा दंष्ट्रादशनभासुरा ।
विशाललोचना नारी वृत्तपीनपयोधरा ॥ १८ ॥

चन्द्रहासं च डमरुं शिरः पात्रं च बिभ्रती ।
एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता ॥ १९ ॥

तेजोमण्डलदुर्धर्षा भ्रामरी चित्रकान्तिभृत् ।
चित्रानुलेपना देवी चित्राभरणभूषिता ॥ २० ॥

चित्रभ्रमणपाणिः सा महामारीति गीयते ।
इत्येता मूर्तयो देव्या व्याख्याता वसुधाधिप ॥ २१ ॥

जगन्मातुश्चण्डिकायाः कीर्तिताः कामधेनवः ।
इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया ॥ २२ ॥

व्याख्यानं दिव्यमूर्तीनामधीष्वावहितः स्वयम् ।
तस्मात्सर्वप्रयत्नेन देवीं जप निरन्तरम् ॥ २३ ॥

सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्यासमैरपि ।
पाठमात्रेण मन्त्राणां मुच्यते सर्वकिल्बिषैः ॥ २४ ॥

देव्या ध्यानं मया ख्यातं गुह्याद्गुह्यतरं महत् ।
तस्मात्सर्वप्रयत्नेन सर्वकामफलप्रदम् ॥ २५ ॥

इति मूर्तिरहस्यं समाप्तम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

देव्यपराधक्षमापनस्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥ १ ॥

विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ २ ॥

पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ३ ॥

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमति भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

परित्यक्त्वा देवान्विविधविधिसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥ ५ ॥

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
मनः को जानीते जननि जपनीयं जपविधौ ॥ ६ ॥

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥ ७ ॥

न मोक्षस्याकाङ्क्षा न च विभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवनीति जपतः ॥ ८ ॥

नाराधितासि विधिना विविधोपचारैः
किं रूक्षचिन्तनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किंचन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ॥ ९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति ॥

जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरंपरावृतं न हि माता समुपेक्षते सुतम् ॥ ११ ॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु ॥

इति श्रीमत्परहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादविरचितं
देव्यपराधक्षमापनस्तोत्रं संपूर्णम् ॥

देवीस्तुतिः

श्रीमातस्त्रिपुरे परात्परतरे देवि त्रिलोकीमहा-
सौन्दार्यार्णवमन्थनोद्भवसुधाप्राचुर्यवर्णोज्ज्वलम् ।
उद्यद्भानुसहस्रनूतनजपापुष्पप्रभं ते वपुः
स्वान्ते मे स्फुरतु त्रिलोकनिलयं ज्योतिर्मयं वाङ्मयम् ॥१॥

आदिक्षान्तसमस्तवर्णसुमणिप्रोते वितानप्रभे
ब्रह्मादिप्रतिमाभिकीलितषडाधाराब्जकक्ष्योन्नते ।
ब्रह्माण्डाब्जमहासने जननि ते मूर्तिं भजे तन्मयीं
सौषुम्णायतबीजपङ्कजमहामध्ये त्रिकोणे स्थिताम् ॥ २ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

यत्ते देवि तृतीयबीजमनलज्वालालवं संनिभं
सर्वाधारतुरीयबीजमपरं ब्रह्माभिधाशब्दितम् ।
मूर्धन्यान्तविसर्गभूषितमहाकारात्मकं तत्परं
संविद्रूपमनन्यतुल्यमहिमा स्वान्ते मम द्योतताम् ॥ ३ ॥

हा हा क्षोभकरैर्व्रतैर्बहुविधैर्दानैश्च होमैर्जपैः
संतानैर्हयमेधमुख्यसुमुखैर्नानाविधैः कर्मभिः ।
यत्संकल्पविकल्पभावमलिनं ख्यातं पदं तस्य ते
दूरादेव निवर्तते परतरं मातः पदं निर्मलम् ॥ ४ ॥

न्यासं कृत्वा गणेशग्रहभगणमहायोगिनीराशिपीठैः
पञ्चाशन्मातृकार्णैर्विविधबहुकलैरष्टवाग्देवताभिः ।
सुश्रीकण्ठादियुक्तैर्निजविमलतनौ केशवाद्यैश्च तत्त्वैः
षट्त्रिंशद्भिर्धराद्यैर्भगवति भवतीं यः स्मरेत्स त्वमेव ॥ ५ ॥

देवीस्तुतिः समाप्ता

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

श्रीदुर्गास्तुतिः

कल्पान्ते मधुकैटभासुरपराभूतस्य धातुस्तवैः
प्रीता पङ्कजलोचनस्य नयनान्निर्गत्य निद्रामयी ।
तौ युद्धे परिमोह्य घातितवती तेनैव विश्वेश्वरी
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥ १ ॥

त्रैलोक्ये महिषासुरप्रमथिते संभूय संचिन्तितां
देवानां महसा विनिर्मितवपुस्तैर्दत्तभूषायुधा ।
उच्चैर्नादधुतैर्महासुरबलैरारब्धयुद्धोत्सवा
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥ २ ॥

निःश्वासप्रवहैश्च भूतनिवहैर्विध्वस्तदैत्योत्करा
हत्वा विक्षुरमुत्क्षिपत्य समरे सिंहेन तं चामरम् ।
आशूदग्रकरालबाष्कलबिडालादीनपि क्षिण्वती
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥ ३ ॥

प्राप्तं क्षोभितविश्वमाशु महिषं संनाशयन्ती ततः
सिंही भूतमथो नराकृतिमिभाकारं लुलायाकृतिम् ।
आक्रम्याङ्घ्रितलेन निर्गतमसुं भूयोऽसिना छिन्दती
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥ ४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

निःशेषामरशक्तिरूपिणि शिवे माये महाविक्रमे
श्रीवागादिविभूतिरूपिणि रणे ऽप्युद्यत्कृपानुग्रहे ।
शूलाद्यैरपि पालयेति दिविजैः स्तुता दिशन्ती वरं
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥ ५ ॥

दृप्यच्छुम्भनिशुम्भविक्रमचिरक्लिष्टैः सुरेन्द्रैः स्तुता
पार्वत्या वपुषो ऽवतीर्य ललिताकारा हिमाद्रेस्तटे ।
डोलाकेलिविमोहितत्रिभुवना सा चण्डमुण्डेक्षिता
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥ ६ ॥

चण्डावेदितरूपजातमदनस्तम्भेन शुम्भेन च
द्राग्दूते प्रहिते नियुद्धविजयी भर्ता ममेत्यूचिषी ।
युद्धेच्छुं किल धूम्रलोचनमथो सैन्यान्वितं धून्वती
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥ ७ ॥

चण्डे मुण्डयुते समेयुषि बलैः कालीमलीकान्तरां-
त्सृष्ट्वा भक्षितसैन्यशस्त्रकुलया तौ घातयन्ती तया ।
प्राप्ते शुम्भबले च केसरिधनुः क्ष्वालीरवोद्घोषिणी
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥ ८ ॥

ब्रह्माण्यादिषु संगतासु शिवदूतीं च स्वशक्तिं तदा
सृष्ट्वा तत्प्रहितेन्दुमौलिवचसा दैत्यैः प्रवृत्ते रणे ।
क्रुद्धयन्मातृगणार्दितं रिपुबलं दृष्ट्वा प्रविष्टाशया
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥ ९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

प्राप्तं संयति रक्तबीजमसुरं मातृप्रहारोद्गल-
द्रक्तोद्भूतभटौघपूर्णभुवनं भीतिप्रदं पश्यताम् ।
काल्या तत्क्षणपीतनष्टरुधिरं शस्त्रोत्करैर्निघ्नती
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥१०॥

घोरे शुम्भनिशुम्भयोरथ रणारम्भे निशुम्भासुरं
खड्गाद्यैः कृतयुद्धमात्तपरशुं संमोह्य बाणोत्करैः ।
शुम्भं शक्तिशरौघभीषणरणं शूलार्दितं तन्वती
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥११॥

भूयः प्राप्तनिशुम्भमुक्तमभितश्चक्रायुतं छिन्दती
खड्गच्छिन्नगदासिशूलमथ तं शूलेन भित्त्वोरसि ।
वक्षोनिर्गतमन्यदस्य च वपुः खड्गेन निष्कृन्तती
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥१२॥

पञ्चास्येनं च मातृभिश्च मथिते सैन्ये समभ्येयुषः
शुम्भस्यान्यबलावलम्बवचसा देवी विलोक्य स्वयम् ।
शस्त्रास्त्रोत्करभीषणं चिरतरं तेनाहवं तन्वती
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥१३॥

छिन्नास्त्रेण तलप्रहारमथितेनानेन धृत्वा रुषा
व्योमान्तं गमिता नियुद्धमधिकं कृत्वाथ निष्पात्य तम् ।
शूलेन प्रविदार्य सर्वभुवनं निर्व्याकुलं कुर्वती
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥१४॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

आपन्नार्तिहरे प्रसीद शुभदे विश्वेशि नारायणि
ब्रह्माण्यादितनौ प्रपालय भयाच्छूलासिघण्टादिभिः ।
रोगादीञ्जहि सर्वदायिनि वरं देहीति देवैः स्तुता
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥१५॥

भूयश्चापि तदा तदा रिपुबलं हन्तास्म्यहं चिन्तिता
मन्माहात्म्यकथापरानपि सदा सर्वत्र रक्षाम्यहम् ।
तेषां चाभिमतं ददाम्यखिलमित्युक्त्वा ततोऽन्तर्हिता
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥१६॥

माहात्म्यं च सुमेधसा नु कथितं श्रुत्वा महीभृद्विशोः
सह्याद्रौ विहितत्रिवर्षतपसोः प्रत्यक्षतामेयुषी ।
भूभर्त्रे ददती पुनर्मनुपदं वैश्याय बोधप्रदा
रोद्धुं घोरकृतान्तसैन्यमिह मे दुर्गैव दुर्गायताम् ॥१७॥

श्रीदुर्गास्तुतिपद्यसप्तदशकं नित्यं पठन्मानवो
मुक्त्वा मृत्युभयं विहाय विपदं लब्ध्वाखिलं काङ्क्षितम् ।
मुक्तिं चापि लभेत मुक्तिनिलये देव्याः कृपागौरवा-
न्निःशेषं फलमश्नुवीत गिरिजामाहात्म्यपाठोद्भवम् ॥

इति श्रीदुर्गास्तुतिः संपूर्णा ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

दुर्गाचन्द्रकलास्तुतिः

वेधोहरीश्वरस्तुत्यां विहर्त्रीं विन्ध्यभूधरे ।
हरप्राणेश्वरीं वन्दे हन्त्रीं विबुधविद्विषाम् ॥ १ ॥

अभ्यर्थनेन सरसीरुहसंभवस्य
त्यक्त्वोदिता भगवदक्षिपिधानलीलाम् ।
विश्वेश्वरी विपदपागमने पुरस्ता-
न्माता ममास्तु मधुकैटभयोर्निहन्त्री ॥ २ ॥

प्राङ्निर्जरेषु निहितैर्निजशक्तिलेशै-
रेकीभवद्भिरुदिताखिललोकगुप्त्यै ।
संपन्नशस्त्रनिकरा च तदायुधस्थै-
र्माता ममास्तु महिषान्तकरी पुरस्तात् ॥ ३ ॥

प्रालेयशैलतनया तनुकान्तिसंप-
त्कोशोदिता कुवलयच्छविचारुदेहा ।
नारायणी नमदभीप्सितकल्पवल्ली
सुप्रीतिमावहतु शुम्भनिशुम्भहन्त्री ॥ ४ ॥

विश्वेश्वरीति महिषान्तकरीति यस्या
नारायणीत्यपि च नामभिरङ्कितानि ।
सूक्तानि पङ्कजभुवा च सुरर्षिभिश्च
दृष्टानि पावकमुखैश्च शिवां भजे ताम् ॥ ५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

उत्पत्तिदैत्यहननस्तवनात्मिकानि
संरक्षकाण्यखिलभूतहिताय यस्याः ।
सूक्तान्यशेषनिगमान्तविदः पठन्ति
तां विश्वमातरमजस्रमभिष्टवीमि ॥ ६ ॥

ये वैप्रचित्तपुनरुत्थितशुम्भमुख्यै-
र्दुर्भिक्षघोरसमयेन च कारितासु ।
आविष्कृतास्त्रिजगदार्तिषु रूपभेदा-
स्तैरम्बिका समभिरक्षतु मां विपद्भ्यः ॥ ७ ॥

सूक्तं यदीयमरविन्दभवादिदृष्ट-
मावर्त्य देव्यनुपदं सुरथः समाधिः ।
द्वावप्यवापतुरभीष्टमनन्यलभ्यं
तामादिदेवतरुणीं प्रणमामि देवीम् ॥ ८ ॥

माहिष्मतीतनुभवं च रुरुं च हन्तु-
माविष्कृतैर्निजरसादवतारभेदैः ।
अष्टादशाहतनवाहतकोटिसंख्यै-
रम्बा सदा समभिरक्षतु मां विपद्भ्यः ॥ ९ ॥

एतच्चरित्रमखिलं लिखितं हि यस्याः
संपूजितं सदन एव निवेशितं वा ।
दुर्गं च तारयति दुस्तरमप्यशेषं
श्रेयः प्रयच्छति च सर्वमुमां भजे ताम् ॥ १० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

यत्पूजनस्तुतिनमस्कृतिभिर्भवन्ति
प्रीताः पितामहरमेशहरास्त्रयोऽपि ।
तेषामपि स्वकगुणैर्ददतीं वपूंषि
तामीश्वरस्य तरुणीं शरणं प्रपद्ये ॥ ११ ॥

कान्तारमध्यदृढलग्नतयावसन्ना
मग्नाश्च वारिधिजले रिपुभिश्च रुद्धाः ।
यस्याः प्रपद्य चरणौ विपदस्तरन्ति
सा मे सदास्तु हृदि सर्वजगत्सवित्री ॥ १२ ॥

बन्धे वधे महति मृत्युभये प्रसक्ते
वित्तक्षये च विविधे च महोपतापे ।
यत्पादपूजनमिह प्रतिकारमाहुः
सा मे समस्तजननी शरणं भवानी ॥ १३ ॥

बाणासुरप्रहितपन्नगबन्धमोक्ष-
स्तद्बाहुदर्पदलनादुषया च योगः ।
प्राद्युम्निना द्रुतमलभ्यत यत्प्रसादा-
त्सा मे शिवा सकलमप्यशुभं क्षिणोतु ॥ १४ ॥

पापः पुलस्त्यतनयः पुनरुत्थितो मा-
मद्यापि हर्तुमयमागत इत्युदीतम् ।
यत्सेवनेन भयमिन्दिरयावधूतं
तामादिदेवतरुणीं शरणं गतोऽस्मि ॥ १५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

यद्ध्यानजं सुखमवाप्यमनन्तपुण्यैः
साक्षात्तमच्युतपरिग्रहमाश्ववापुः ।
गोपाङ्गनाः किल यदर्चनपुण्यमात्रा-
त्सा मे सदा भगवती भवतु प्रसन्ना ॥ १६ ॥

रात्रिं प्रपद्य इति मन्त्रविदः प्रपन्ना-
नुद्बोद्ध्य मृत्यवधिमन्यफलैः प्रलोभ्य ।
बुद्ध्वा च तद्विमुखतां प्रतनं नयन्ती-
माकाशमादिजननीं जगतीं भजे ताम् ॥ १७ ॥

देशकालेषु दुष्टेषु देवीचन्द्रकलास्तुतिः ।
संध्ययोरनुसंधेया सर्वापद्विनिवृत्तये ॥

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्य-
चतुरधिकशतप्रबन्धनिर्वाहकमहाव्रतयाजिश्रीमदप्पय्यदीक्षि-
तेन्द्राणां कृतिष्वन्यतमा श्रीदुर्गाचन्द्रकला-
स्तुतिः समाप्ता ॥

चण्डीरहस्यम्

यच्छक्तिलेशसकृद्दर्पणपात्रभाव-
मात्रादपि द्रुहिणशौरिमहेश्वराणाम् ।
प्राप्तो यदि श्रुतिशतैः परमात्मभाव-
स्तामम्ब देवि भवतीं किमिति स्तुवन्तु ॥ १ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

कृत्वा मुखं पशुपतिर्भवतीं किलैकां
निर्माति पालयति हन्ति जगन्ति देवः ।
तज्जामिताविपरिवृत्तिकृते तमेव
शंभुं मुखं कृतवती भवतीति मन्ये ॥ २ ॥

विश्वं नियच्छति विशृङ्खलचेष्टितो यः
सोऽपि त्वया नियमनीय इति स्फुटं नः ।
वैवस्वतं चिकुरभावजुषं यदम्ब
बध्नासि वेणिकबरीग्रथनादिभेदैः ॥ ३ ॥

भ्रूकिंकराणि भुवनानि तव भ्रुवौ च
संध्यात्मिके इति गृणन्ति यतोऽत एव ।
कर्माणि मातरितराणि करोतु मा वा
संध्यां पुनर्भजत एव समस्तलोकः ॥ ४ ॥

जाता दृशो जननि पावकतेजसैव
तिस्रस्तवेत्यपि किमागमबोध्यमेतत् ।
पापान्यपाङ्गवलनैः परिमार्जतीनां
तासां च पावकपदे विचिकित्सते कः ॥ ५ ॥

मूल्यं न यस्य भुवनानि चतुर्दशापि
मुक्ताफलं वहति तत्तव नासिकेति ।
चित्रीयते किमपि चेतसि मे न मातः
किं राजराजपदवीं भजतामलभ्यम् ॥ ६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

नासाधिकारमिह गन्धवहात्मकत्वं
देवि श्रुती स्वयमपाहरतां भवत्याः ।
सर्वाः श्रुतीरपि तु सा स्ववशे चकार
किं दुर्लभं त्रिषु जगत्सु धनेश्वराणाम् ॥ ७ ॥

प्राञ्चो जगज्जननि ये पतयः प्रजानां
ते देवि संववृतिरे दशनात्मना ते ।
नो चेत्तदन्तिकतले रसनाग्रभागे
किं भारती वसति किंकरतां गतेव ॥ ८ ॥

स्वेनात्मना मुररिपुर्दनुजैर्विगृह्य
वारान्कतीह न बभार पराङ्मुखत्वम् ।
ओजायितुं स निरपायमुपायवेदी
वाहात्मना परिणतो नियतं भवत्याः ॥ ९ ॥

वर्षन्करो महिषमर्दिनि ते वसूनि
प्रस्तूयतां कविजनैर्न ममाद्भुतं तत् ।
आसादिता वसुभिरङ्गुलिता यदीया
कस्तस्य शंस वसुवर्षविधौ प्रयासः ॥ १० ॥

सोमेऽमृतं कतिचिदेव सुरा लभन्ते
तल्लभ्यमस्तु जगतामिति तर्कयन्त्या ।
नीतः पयोधरदशां स शिवे त्वया य-
दस्माद्दशामयमतर्कितभाग्ययोगः ॥ ११ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ब्रह्मर्षिशापभवया त्रपया महत्या
प्रागास्त यः क्वचन देवि सरस्यदृश्यः ।
नूनं स एव विबुधाधिपतिर्भवत्याः
प्राप्तो विलग्नपदवीमधुनाप्यदृश्यः ॥ १२ ॥

पादौ बभूव तव पद्मभवस्ततः किं
बाह्वात्मना परिणनाम हरिस्ततः किम् ।
सिद्धा नितम्बविधया वसुधा यदा ते
सिद्धस्तदा पुरहरस्य मनोरथोऽयम् ॥ १३ ॥

यद्वारुणं कथितमूरुयुगं सजङ्घ-
मिन्दीवरच्छदसकान्ति न वारुणं तत् ।
प्राचेतसं तदिह वर्णयितुं क्षमेत
प्राचेतसं कविकुलप्रथमं विना कः ॥ १४ ॥

वक्त्रैरकृत्रिमवचांसि वहन्विषण्णो
वेधाश्चिरं विपरिणम्य पदात्मना ते ।
संधार्यतेऽद्य शिरसा सकलैरमीभिः
क्लिष्टश्चिरात्किमुपयातु न जातु हर्षम् ॥ १५ ॥

बाह्यं तमो हरति यस्तपनः कथंचि-
त्पादौ नवाङ्गुलितयाम्ब भजन्स एव ।
अन्तस्तमांसि च हरत्यतिदुर्हराणि
किं सेव्यसे वनविधिर्न करोति पुंसाम् ॥ १६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

देवेषु वासवमुखेषु निजां निधाय
शक्तिं यदम्ब समये पुनरग्रहीस्त्वम् ।
कर्पूरभाजननयादधुनापि ते ते
कीर्तिं वहन्ति कियतीमपि तावतैव ॥ १७ ॥

तेजांसि च प्रहरणानि च यानि यानि
देवेषु देवि निहितानि पुरा भवत्या ।
तान्येव निष्फलतराणि तदाश्रितानि
त्वत्स्वीकृतानि फलवन्ति बभूवुरित्थम् ॥ १८ ॥

शक्त्या यया दिविचरा अतिशेरते ऽस्मान्
सा चेत्त्वमित्यवगतं सकलैश्च तन्त्रैः ।
किं त्वं विचारकुशलैरसि सेवनीया
किं देवतास्तव ऋजीषदशां प्रपन्नाः ॥ १९ ॥

इन्द्रं यजन्तु तव गर्भमुपासते ते
वह्निं यजन्तु नयने तव तर्पयन्ति ।
भानुं नमन्तु विनमन्ति पदाम्बुजं ते
सर्वं जगन्ननु समर्चति सर्वथा त्वाम् ॥ २० ॥

केचित्प्रतीकमितरे तु समग्ररूप-
माराधयन्ति तव ये पुनरास्तिका स्युः ।
नांस्तिक्यवादनिरता नरके पतन्तो
ऽप्यम्ब स्तुवन्ति चिकुरात्मकमन्तकेन ॥ २१ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

शौरिं विबोध्य समराय तमुद्यमय्य
व्यामोह्य दानववरौ कृतसंविधाना ।
मातस्त्वमेव मधुकैटभयोर्निहन्त्री
शार्ङ्गी कृते भवति शस्त्रपदाभिषिक्तः ॥ २२ ॥

दैत्यौ वरं वितरतो निजनाशरूपं
दैत्यारये त्रिजगतां वरदो वरार्थी ।
इत्थं प्रचोदितधियां क्षममीश्वरत्वं
युक्तेषु किं न सचिवोऽपि नृपं नियुङ्क्ते ॥ २३ ॥

न्यस्तं यदा शिरसि पादतलं भवत्या
लब्धं तदैव महिषेण परं पदं ते ।
हन्तुं पुनर्यदिदमाददिषे त्रिशूलं
तं ते जगज्जननि सङ्गरसंभ्रमेण ॥ २४ ॥

कस्त्वां रणे जयतु कस्तव हर्तु दर्पं
को वास्तु ते प्रतिभटो भविता पतिः कः ।
दैत्यं प्रतारयितुमेव कृतोऽभ्युपायो
देवं तु विस्मृतवती भवती महेशम् ॥ २५ ॥

चण्डि द्विषस्तव निपेतुरपेतकृत्या-
श्चण्डाट्टहासनिनदैरिति नाद्भुतं नः ।
दृष्टक्रियस्त्रिषु पुरेषु तवाप्रसिद्धो
मन्दस्मितार्धमहिमा न हि मादृशानाम् ॥ २६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

कर्माणि यानि दश ते जनभीषणानि
कल्याणदानि भजतामभिजानतां वा ।
तैरेव विश्वमखिलं परिवृत्तिभेदै-
र्बध्नासि मुञ्चसि च कुञ्चिकयेव यन्त्रम् ॥ २७ ॥

अन्वासितं हरिहरद्रुहिणैः सदारै-
र्जामातृभिस्तदनुभवैर्दुहितुः सुतैश्च ।
अग्रोपवेशितजगज्जननीसमाज-
माराधये जननि रूपमनुत्तरं ते ॥ २८ ॥

सर्वानुकम्पनपरं स्वकृतोपदेशैः
सार्वज्ञगर्वशमनं तरुणेन्दुमौलेः ।
सत्त्वैकसारमकृतोक्तिपदानुसारं
सारस्वतं वपुरिदं तव चिन्तयामः ॥ २९ ॥

नन्दात्मजेति ननु वर्षसि हेमराशिं
शाकंभरीति शमयस्युदरोपसर्गान् ।
योगीश्वरीति परिहृत्य भयानि भक्ता-
न्मातेव पाययसि च कामदुघौ स्तनौ ते ॥ ३० ॥

इच्छात्मिका पुरहरस्य चिदात्मिका च
शक्तिस्त्रिलोकविदिते न हि तत्र शङ्का ।
ते चार्चिते जनयतः किल यत्प्रसादं
तामाश्रये भगवतः कृतिशक्तिमाम्बाम् ॥ ३१ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

त्वं चेतनासि हृदयं त्वमसि प्रजानां
त्वं वृत्तयो धृतिमतिप्रमुखास्तदीयाः ।
किं साधनैरभिमुखीकरणं तव स्या-
त्स्वेनैव देवि दयसे यदि तद्दयेथाः ॥ ३२ ॥

त्वत्पूजनं यदिह जानदजानदर्हं
मातश्चकर्थ महती किल चातुरीयम् ।
जानद्भिरेव भवती यदि पूजनीया
लुप्येत पूजनकथैव जगत्त्रये ते ॥ ३३ ॥

यावत्परत्वमखिलागमबोधितं ते
तावत्ततः शतगुणं च सुखाश्रयासि ।
वेदास्त्वदर्चनविधानपरा हि नो चे-
दम्ब स्युरब्धितरणोक्तिवदप्रमाणम् ॥ ३४ ॥

प्राज्ञानभिज्ञसुलभां परिपूर्णशक्ति-
मव्याजभूतकरुणापरिणामरूपाम् ।
अम्बां मनागपि मनस्यवलम्बमाना
धीरा न बिभ्यति कथंचिदितोऽमुतो वा ॥ ३५ ॥

अभ्यर्थनीयमखिलं भवदाश्रिताना-
मभ्यर्थितं प्रथममेव हि देवसंघैः ।
अम्ब स्मरन्सफलयाम्यवशिष्टमायु-
रङ्गानि ते भुवनमङ्गलमङ्गलानि ॥ ३६ ॥

इति श्रीनीलकण्ठदीक्षितविरचितं चण्डीरहस्यं समाप्तम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

श्रीदेवीमाहात्म्यस्तोत्रम्

लक्ष्मीशे योगनिद्रां प्रभजति भुजगाधीशतल्पे सदर्पा-
वुत्पन्नौ दानवौ तच्छ्रवणमलमयाङ्गौ मधुं कैटभं च ।
दृष्ट्वा भीतस्य धातुः स्तुतिभिरभिनुतामाशु तौ नाशयन्तीं
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ १ ॥

युद्धे निर्जित्य दैत्यस्त्रिभुवनमखिलं यस्तदीयेषु धिष्ण्ये-
ष्वास्थाप्य स्वान्विधेयान्स्वयमगमदसौ शक्रतां विक्रमेण ।
तं सामात्याप्तमित्रं महिषमपि निहत्यास्य मूर्धाधिरूढां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ २ ॥

विश्वोत्पत्तिप्रणाशस्थितिविहृतिपरे देवि घोरामरारि-
त्रासात्त्रातुं कुलं नः पुनरपि च महासंकटेष्वीदृशेषु ।
आविर्भूयाः पुरस्तादिति चरणनमत्सर्वगीर्वाणवर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुत्मूलनाय ॥ ३ ॥

हन्तुं शुम्भं निशुम्भं त्रिदशगणनुतां हेमडोलां हिमाद्रा-
वारूढां व्यूढदर्पान्युधि निहतवतीं धूम्रदृक्चण्डमुण्डान् ।
चामुण्डाख्यां दधानामुपशमितमहारक्तबीजोपसर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

ब्रह्मेशस्कन्दनारायणकिटिनरसिंहेन्द्रशक्तीः स्वभृत्याः
कृत्वा हत्वा निशुम्भं जितविबुधगणं त्रासिताशेषलोकम् ।
एकीभूयाथ शुम्भं रणशिरसि निहत्यास्थितामात्तखड्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ५ ॥

उत्पन्ना नन्दजेति स्वयमवनितले शुम्भमन्यं निशुम्भं
भ्रामर्याख्यारुणाख्या पुनरपि जननी दुर्गमाख्यं निहन्तुम् ।
भीमा शाकंभरीति त्रुटितरिपुभटां रक्तदन्तेति जातां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ६ ॥

त्रैगुण्यानां गुणानामनुसरणकलाकेलिनानावतारै-
स्त्रैलोक्यत्राणशीलां दनुजकुलवनीवह्निलीलां सलीलाम् ।
देवीं सच्चिन्मयीं तां वितरितविनमत्सत्रिवर्गापवर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ७ ॥

सिंहारूढां त्रिनेत्रां करतलविलसच्छङ्खचक्रासिरम्यां
भक्ताभीष्टप्रदात्रीं रिपुमथनकरीं सर्वलोकैकवन्द्याम् ।
सर्वालंकारयुक्तां शशियुतमकुटां श्यामलाङ्गीं कृशाङ्गीं
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ८ ॥

त्रायस्व स्वामिनीति त्रिभुवनजननि प्रार्थना त्वय्यपार्था
पाल्यन्तेऽभ्यर्थनायां भगवति शिशवः किन्त्वनन्या जनन्याः ।
तत्तुभ्यं स्यान्नमस्येत्यवनुतविबुधाह्लादिवीक्षाविसर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

एतत्सन्तः पठन्तु स्तवमखिलविपज्जालतूलानलाभं
हृन्मोहध्वान्तभानुप्रतिममखिलसंकल्पकल्पद्रुकल्पम् ।
दौर्गं दौर्गत्यघोरातपतुहिनकरप्रख्यमंहो गजेन्द्र-
श्रेणीपञ्चास्यदेश्यं विपुलभयदकालाहिताक्ष्यर्प्रभावम् ॥१०॥

इति श्रीदेवीमाहात्म्यस्तोत्रं सम्पूर्णम् ।

श्रीदुर्गासप्तश्लोकी

श्रीशिव उवाच—

देवि त्वं भक्तिसुलभे सर्वकार्यविधायिनि ।
कलौ हि कार्यसिद्ध्यर्थमुपायं ब्रूहि यत्नतः ॥

देव्युवाच—

शृणु देवि प्रवक्ष्यामि कलौ सर्वेष्टसाधनम् ।
मया तवैव स्नेहेनाप्यम्बास्तुतिः प्रकाश्यते ॥

ॐ अस्य श्रीदुर्गासप्तश्लोकीस्तोत्रमन्त्रस्य नारायणऋषिः, अनुष्टुप् छन्दः, श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः । श्रीदुर्गासप्तश्लोकीपाठे विनियोगः ।

ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

दुर्गे स्मृते हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥

रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥

य एतत्परमं गुह्यं सर्वरक्षाविशारदम् ।
देव्या संभाषितं स्तोत्रं सदा साम्राज्यदायकम् ॥

शृणुयाद्वा पठेद्वापि पाठयेद्वापि यत्नतः ।
परिवारयुतो भूत्वा त्रैलोक्यविजयी भवेत् ॥

इति श्रीदुर्गासप्तश्लोकी समाप्ता ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

दुर्गासूक्तम्

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
सनः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥

अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥

विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरितातिपर्षि ।
अग्ने अत्रिवन्मनसा गृणानो ऽस्माकं बोध्यविता तनूनाम् ॥

पृतनाजितं सहमानमुग्रमग्निं हुवेम परमात्स्वधस्तात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अतिदुरितात्यग्निः ॥

प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वां चाग्ने तनुवं पिप्रियस्वास्मभ्यं च सौभगमायजस्व ॥

गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसंचरेम ।
नाकस्य पृष्ठमभिसंवसानो वैष्णवीं लोकं इह मादयन्ताम् ॥

कात्यायनाय विद्महे कन्यकुमारि धीमहि ।
तन्नो दुर्गिः प्रचोदयात् ॥

इति दुर्गासूक्तं संपूर्णम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

OUR PUBLICATIONS

	Rs.	A.
BHAGAVADGĪTASĀRA, with stories from Padmapūraṇa ...	0	6
DURGĀSAHASRANĀMA, with Namavali in Sanskrit ...	0	6
DEVĪMĀHĀTMYA, in Sanskrit with Navāṅga	1	4
LALITATRIS'ATI, with Tamil translation ...	1	0
LALITAṢTOTTARA, with Tamil translation ...	0	6
LALITOPĀKHYĀNA, in Tamil ...	2	0
VIṢNUSAHASRANĀMA, etc. in Tamil ...	0	4

Under Preparation

DAKṢIṆĀMŪRTISTOTRA, with the Sanskrit commentaries of Anandagiri and Svayamprakāsāyati with Tamil translation.

LAGHUSTUTI with the Sanskrit Commentaries of Simharaja, Somatilakasūri and Rāghavānanda.

LAGHUSTUTI with Tamil translation.

LALITĀSAHASRANĀMA with Tamil translation.

SAUNDARYALAHARĪ, with Tamil translation.

TRIPUROPANIṢAD, with Tamil translation.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

N. Rajam & Co.,
43 Purasawalkam High Rood,
Vepery, Madras.

Indian Industrial Co. Ltd.,
363 Esplanade, Madras.

Sri Lakshmi Vilas Book Depot,
Pycroft's Road, Triplicane,
Madras.

Sri Janardana Printing Works Ltd.,
Town High School Road,
Kumbakonam.

A. Palani & Co.,
Teppakulam, Trichy.

Srividyanilayam Book Depot,
Raja Street, Coimbatore.

R. S. Vadhyar & Sons,
Kalpathy, Palghat.

S. V. Venkatarama Ayyar Sons,
Trichur.

E. M. Gopalakrishna Kone,
Madura.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry